© 2018 IJSRSET | Volume 4, Issue 1, January-February-2018
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 1797-1827

# Analytical Study on Moksha in The Combined Reference of Vednata, Yoga and Ayurveda

# मोक्षस्वरूपे तत्प्राप्तौ च योगायुर्वेदवेदान्तशास्त्राणां समन्वयः

Prajwal J
Department of Advitha Vedantha, Rashtriya Sanskrit Sansthan, India

**सारांशः -** वेदः अभ्युदयनिःश्रेयससाधनम् उच्यते। उक्तञ्च – "अभ्युदय-निःश्रेयससाधनं वेदार्थसम्प्रदायम्" इति। तत्र अभ्युदयो नाम लौकिकानि अलौकिकानि च सुखानि। उक्तञ्च – "विषयाभिमुख्येन उदेतीति अभ्युदयो विषयाधीनं सुखं स्वर्गादिकम्" इति। निःश्रेयसं तु मोक्षः। उक्तञ्च – "नित्यं निरपेक्षं श्रेयो निःश्रेयसः मोक्षः" इति। तत्र अभ्युदयः कर्मफलसाध्यम्। निःश्रेयसं तु कर्मनिरपेक्षं ब्रह्मज्ञानसाध्यम्। वेदान्तशास्त्रं तु मोक्षशास्त्रं निःश्रेयसप्रयोजनम्। उक्तञ्च- "वेदान्तवाक्य-मीमांसा तदविरोधितर्कोपकरणा निःश्रेयस-प्रयोजना प्रस्तूयते" इति। तथापि मन्दानाम् अशुद्धचित्तानां साक्षात् ब्रह्मज्ञानप्रवेशः असाध्यः इति कृत्वा चित्तशुद्धिद्वारा मोक्षानुभूतिसिद्ध्यर्थं कर्मोपासानाद्युपायाः वेदान्तशास्त्रे प्रतिपाद्यन्ते। एवं च वेदान्तशास्त्रम् अभ्युदय-निःश्रेयससाधनम् इति प्रतिपादयितुं शक्यते। अस्मिन् शोधप्रबन्धे वेदान्तप्रतिपाद्यस्य निःश्रेयसस्य स्वरूपं, तत्साधनानि उपासनादीनि उपायानि अभ्युदफलानि च संक्षेपेण प्रतिपाद्यन्ते। अस्मिन् विषये योगायुर्वेदशास्त्रयोः विचारश्च अत्र प्रस्तूयते।

**मुख्याः** शब्दाः – वेदान्तः, मोक्षः, अभ्युदयम्, निःश्रेयसः, ब्रह्म, ब्रह्म, निरतिशयानन्दः, कर्म, विदेहमुक्तिः, कैवल्यम्।

---

**निःश्रेयसस्वरूपम्-** जीवः सर्वान् धर्मान् अपोह्य ब्रह्मभावमाप्नोति इति अवस्थात्रयरहितम् अन्नमयादिकोशव्यतिरिक्तं ब्रह्म द्वितीये अध्याये प्रतिपादितम्। जीवस्य अयं यो ब्रह्मभावः मोक्षनामा इदानीं निरूप्यते।

**अविद्यानिवृत्तौ स्वस्वरूपे ब्रह्मभावे अवस्थानं मोक्षः** – शरीरेन्द्रियादि-सकल-प्रपञ्चः बन्धहेतुः। अयं च शरीरादिसम्बन्धः आविद्यकः इति प्राक् दर्शितम्। आत्यन्तिकेन शरीरादिसम्बन्धाभावेन युक्ते स्वस्वरूपे अवस्थानं मोक्षः। उक्तञ्च – "अविद्यानिवृत्तौ स्वात्मन्यवस्थानं परप्राप्तिः"[1], "अविद्यादिबन्धापनयनमेव मोक्षमिच्छन्ति ब्रह्मविदः"[2], "ब्रह्म वेद ब्रह्मैव भवति"[3] इत्यादिरूपेण।

योगशास्त्रविदः अपि अविद्यानिवृत्त्या स्वात्मन्यवस्थानमेव कैवल्यं वदन्ति। दृश्यरूपा बुद्धिः त्रिगुणात्मिका जडा अविद्यावशात् पुरुषेण सह संयुक्ता भवति। यदा विवेकज्ञानेन अविद्या निवर्तते तदा पुरुषः स्वरूपे प्रतिष्ठितः भवति। उक्तञ्च – "तदभावात् संयोगाभावो तद्दृशेः कैवल्यम्"[4], "पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति"[5], "या तु द्रष्टुः स्वरूपोपलब्धिः सोऽपवर्गः"[6] इत्यादिरूपेण।

आयुर्वेदे अपि जीवस्य ब्रह्मभावः एव मोक्षः इति प्रतिपाद्यते। उक्तञ्च –

**"अतः परं ब्रह्मभूतो भूतात्मा नोपलभ्यते।**
**निःसृतसर्वभावेभ्यश्चिह्नं यस्य न विद्यते।**
**ज्ञानं ब्रह्मविदां चात्र नाज्ञस्तज्ज्ञातुमर्हति॥"**[7],

**"निर्वृत्तिरपवर्गः; तत्परं प्रशान्तं तदक्षरं तद्ब्रह्म स मोक्षः"**[8] इत्यादिरूपेण।

---

1. तै.शीक्षा.भा.1/1
2. मुं.भा.3/2/6
3. मुं.उ.3/2/9
4. यो.सू.2/25
5. यो.सू.4/34
6. व्यासभाष्यम् (यो.सू.) 2/23
7. चरक.शारीर.1/155

किञ्च चरके विपापः, विरजः, शान्तं, परम्, अक्षरम्, अव्ययम्, अमृतं, ब्रह्म, निर्वाणं, शान्तिः इत्यादिभिः पदैः[9] मोक्षस्य व्यपदेशः उपनिषत्प्रतिपादितमेव मोक्षस्वरूपं आयुर्वेदिनः अपि अभ्युपगच्छन्ति इति दर्शयति।

**मोक्षः परमानन्दः** - स्वस्वरूपे अवस्थानं मोक्षः इत्युक्तम्। स्वरूपं च ब्रह्म इति प्रतिपादितं तत्त्वमस्यादिवाक्यैः। ब्रह्म च "आनन्दो ब्रह्मेति व्यजानात्"[10], "विज्ञानमानन्दं ब्रह्म"[11] इत्यादिश्रुतिभ्यः आनन्दस्वरूपम् इति वेदान्तनिश्चयः। स च आनन्दः न सातिशयः, लौकिकानन्दस्य एव सातिशयत्वात्। तदुक्तं – "एतस्यैव आनन्दस्य अन्यानि भूतानि मात्रामुपजीवन्ति"[12],

**"तत्प्रेमात्मार्थमन्यत्र नैवमन्यार्थमात्मनि।**

**अतस्तत् परमं प्रेम परमानन्दमात्मनः॥ "**[13] इति।

**मोक्षः आत्यन्तिकदुःखनिवृत्तिः** – शरीरेन्द्रियादिसकलप्रपञ्चः दुःखहेतुः। उक्तञ्च – "न ह वै सशरीरस्य सतः प्रियाप्रिययोः अपहतिरस्ति"[14] इति। तस्य च प्रपञ्चस्य परिणाम्युपादानकारणमज्ञानमिति प्राक् दर्शितम्। तस्य प्रपञ्चकारणीभूतायाः अविद्यायाः निवृत्तौ, तत्कार्यभूतं दुःखरूपमिदं जगदपि निर्वतते। ततश्च दुःखस्य आत्यन्तिकनिवृत्तिरपि सिद्ध्यति। उक्तञ्च – "तरति शोकमात्मवित्"[15], "तत्र को मोहः कः शोकः एकत्वमनुपश्यतः"[16] , "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः"[17] इति।

योगमते अपि अविद्यानिवृत्तौ सति जन्ममरणादिसंसारचक्रस्य दुःखरूपस्य निवृत्तिः, ततः आत्यन्तिकदुःखोपरमः इति प्रतिपाद्यते। उक्तञ्च – "दुःखकारणनिवृत्तौ दुःखोपरमो हानम्"[18] इति।

आयुर्वेदिनः अपि मोक्षे सुखदुःखमोहादि–वेदनात्मकस्य संसारस्य दुःखरूपस्य अत्यन्तिकनिवृत्तिं वदन्ति। उक्तञ्च –

**"योगे मोक्षे च सर्वासां वेदनानामवर्तनम्"**[19],

**"तस्मिंश्चरमसंन्यासे समूलाः सर्ववेदनाः।**

**ससंज्ञाज्ञानविज्ञाना निवृत्तिं यान्त्यशेषतः॥ "**[20] इति।

**मोक्षः भावरूपः** – निरतिशयप्रीतिरूपा मुक्तिः भावरूपा एव। अत एव न केवलं अविद्यानिवृत्तिः मुक्तिरित्युक्तम्, अपि तु निरतिशयानन्दरूपस्वरुपावस्थानं मोक्षः इति उपनिषदाम् उद्घोषः। मोक्षः स्वस्वरूपम् अभावरूपमिति विरुद्धमेतत् भवेत्। उक्तञ्च आचार्यैः – "मोक्षस्य भावरूपत्वात्"[21] इति।

**मोक्षः नित्यः** - योऽयं ब्रह्मभावः मोक्षः स नित्यः । श्रुतयः मोक्षस्य नित्यत्वं प्रतिपादयन्ति – "न स पुनरावर्तते"[22], "नित्यत्वात् मोक्षस्य"[23] इत्यादिषु। "नित्यं विभुं सर्वगतम्"[24] इति स्वरूपस्य ब्रह्मणः नित्यत्वागमाच्च मोक्षः नित्यः इति अवगम्यते। किञ्च मोक्षः न अत्यन्तमेव अप्राप्तः, येन

---

8. चरक.शारीर.5/11
9. विपापं विरजः शान्तं परमक्षरमव्ययम्। अमृतं ब्रह्म निर्वाणं पर्यायैः शान्तिरुच्यते॥ – चरक.शारीर.6/23
10. तै.उ.भृगु.1/6
11. बृ.उ.3/18
12. बृ.उ.4/3/2
13. पं.दशी.1/9
14. छां.उ.8/12/1
15. छां.उ.1/1/3
16. ईश.उ.7
17. छां.उ.8/12/1
18. व्यासभाष्यम् (यो.सू.) 2/25
19. चरक.शरीर.1/137
20. चरक.शारीर.1/154
21. तै.भा.शीक्षा.1/1
22. छां.उ.8/15/2
23. तै.भा शीक्षा.1/1

© 2018 IJSRSET | Volume 4, Issue 1, January-February-2018
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 1797-1827

तस्य अनित्यत्वम् आशङ्क्येत। स्वरूपत्वेन सिद्धस्य एव निरतिशयान्दरूपब्रह्मण: अविद्याकारणात् य: असिद्धत्वभ्रम:, तन्निरासमात्रं मोक्ष: उच्यते। यथा वलयाकारे विद्यमानस्य रज्जो: दर्शनेन कदाचित् य: सर्पभ्रम:, नायं सर्प: इति वाक्यात् परिहृत: भवति। अत: मोक्ष: प्राप्तस्य एव अप्राप्तत्वभ्रमनिरासमात्रम् इत्यत: अनित्यत्वदोष: न तत्र आशङ्क्य:। अत: नित्य: ब्रह्मभाव: मोक्ष:। नित्यात्वादेव स: धर्मार्थकाममोक्षेषु चतुर्विधपुरुषार्थेषु परमपुरुषार्थ: उच्यते।

योगशास्त्रविद: अपि नित्यमुक्तस्य केवलिन: पुरुषस्य कैवल्यमिति व्यवहार: बुद्ध्यपेक्षया उच्यते इति वदन्ति। अत: अवश्यं यथा पुरुषस्य भोग: बुद्धिकृत: इति अवगम्यते, तथैव तस्य अपवर्गोऽपि बुद्धिकृत: इत्येव ज्ञातव्यम्। यथा जय: पराजय: इति योद्धृषु वर्तमान: स्वामिनि आरोप्यन्ते एवमेव बन्ध: मोक्ष: इति बुद्धिकितौ आत्मनि व्यपदिश्येते। अत एव उक्तं – "ग्रहणधारण–ऊहापोहतत्त्वज्ञानाभिनिवेशा: बुद्धौ वर्तमाना: पुरुषे अध्यारोपितसद्भावा:"[25] इति। अत: मोक्ष: नित्य: इति योगशास्त्रविद: अपि प्रतिपादयन्ति इति स्पष्टम्। आयुर्वेदिन: अपि मोक्षं नित्यं वदन्ति। तथा च उक्तं – "येन गता: न पुनरागता:"[26] इति।

**मोक्ष: ज्ञानैकसाध्य:** – शरीरेन्द्रियादि–अनर्थरूपात् संसारात् निवृत्ति: मोक्ष: इत्युक्तम् । जीविनां शरीरादिकं कर्मफलारभ्यम्। कर्मणामनारम्भश्च कामनिवृत्त्या सिध्यति। उक्तञ्च – "कर्महेतु: काम: स्यात्"[27] इति। कामानामज्ञानमात्रभूतानां निवृत्ति: तद्विरोधिना ज्ञानेन एव भवति। उक्तञ्च – "न च कर्महेतूनां कामानां ज्ञानाभावे निवृत्त्यसम्भवात्"[28] इति। अत: ज्ञानमेव मोक्षं प्रति असाधारणं कारणम्। उक्तञ्च – तमेव विदित्वा अतिमृत्युमेति, नान्य: पन्था: विद्यतेयनाय"[29], "ज्ञानं लब्ध्वा परां शान्तिम् अचिरेणाधिगच्छति"[30], "ज्ञानेन तु तदज्ञानं येषां नाशितमात्मन:"[31], "विद्ययामृतमश्नुते"[32] इत्यादिरूपेण। आचार्या: अपि – "अत: केवलाया: विद्याया: परं श्रेय: इति सिद्धम्"[33], "केवलादेव तत्त्वज्ञानात् मोक्षप्राप्ति:"[34] इत्यादिरूपेण ज्ञानेनैव मोक्षमाहु:। गीतायां भगवता "ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति"[35] ज्ञानस्य मोक्षं प्रति असाधारणकारणत्वं स्पष्टं प्रतिपादितम्। तत्त्वज्ञानं मोक्षसाधनमिति प्रतिपादितम्। तज्ज्ञानं यद्यपि घटपटादिसांसारिक–ज्ञानात् भिन्नं तथापि चित्तवृत्यात्मकमेव इति अवगन्तव्यम्। "अहं ब्रह्मास्मि"[36], "तत्त्वमसि"[37] इत्यादिभि: महावाक्यै: अथवा श्रवणमनननिदिध्यासनै: संस्कृते मनसि अधिकारिण: "अहं नित्यशुद्धबुद्धमुक्तस्वभाव: सच्चिदानन्दं ब्रह्म" इति अखण्डाकारा अन्त:करणवृत्ति: उदेति। सा वृत्ति: तत्र प्रतिबिम्बितं चैतन्यं विषयीकुर्वन्, तद्गतम् अज्ञानं बाधते। तदा अखण्डाकारवृत्त्या सकलकार्यस्य परिणाम्युपादनस्य अज्ञानस्य नाशे सति तत्कार्यस्य सकलस्य प्रपञ्चस्य बाध: भवति। एवं सर्वेषां अज्ञानकार्याणां नाशे, अखण्डाकारा वृत्तिरपि बाधिता भवति, अन्यथा ब्रह्मण: अद्वयत्वहानि: आपद्येत। स्व–उपाधिभूत–अखण्डाकारवृत्ते: अपि बाधितत्त्वात् अद्वयं प्रत्यगभिन्नं ब्रह्म स्वस्वरूपमात्रमविशिष्यते, स मोक्ष:।

**अन्यदपि अत्र अवधेयम्** – ज्ञानैकसाध्य: मोक्ष: इति उक्ते अपि ज्ञनम् अखण्डाकारान्त:करणवृत्तिरूपं केवलम् अज्ञानं बाधते, न स्वरूपज्ञानरूपं मोक्षमुत्पादयति। तस्य उत्पादितत्वे पुनरपि अनित्यत्वदोष: आपद्यते। अत: यथा शैवलाच्छादिते सरसि तदपसरणेन, जलं स्वयं प्रकाशितं भवति तथैव अखण्डाकारान्त:करणवृत्ति: स्वकारणमज्ञानं बाधते, स्वयं च कारणनाशेन नष्टं भवति, तदा स्वस्वरूपं ब्रह्मवस्तु स्वयं सिद्धं भवति।

---

24. मुं.उ.6
25. व्यासभाष्यम् (यो.सू.) 3/19
26. चरक.शारीर.1/150
27. तै.भा.शीक्षा.1/1
28. तै.भा.शीक्षा.1/1
29. श्वेत.उ.3/8
30. भ.गी.4/39
31. भ.गी.5/16
32. ईश.उ.12
33. तै.भा.शीक्षा.12/1
34. गी.भा.2/1
35. भ.गी.4/39
36. बृ.उ.1/4/10
37. छां.उ.6/8

यदिदम् आत्मसाक्षात्कारसाधनं ज्ञानं, मनोवृत्तिरूपं चेदपि न तत् मानसी क्रिया। मानसी क्रिया पुरुषचित्तव्यापाराधीनं भवति, न तु वस्तुस्वरूपसापेक्षं भवति। उदाहरणार्थं "यस्यै देवतायै हविर्गृहीतं स्यात्, तां मनसा ध्यायेत् वषट्करिष्यन्" इति चोदानानुसारं या मानसी ध्यानक्रिया उपदिश्यते सा वस्त्वनपेक्षा पुंतन्त्रा एव चोद्यते। ध्यानस्य मानसत्वे अपि कर्तुम् अकर्तुम् अन्यथाकर्तुं शकयते इति पुरुषतन्त्रमेव तत्। उक्तञ्च समन्वयभाष्ये – "ननु ज्ञानं नाम मानसी क्रिया। न। वैलक्षण्यात्"[38] इति। ज्ञानं तु वस्तुतन्त्रं, कर्तुमकर्तुमन्यथाकर्तुं वा न शक्यते। उक्तञ्च –"ज्ञानं तु प्रमाणजन्यम्। प्रमाणं च यथाभूतवस्तुविषयम्। अतो ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुमशक्यं केवलं वस्तुतन्त्रं हि तत्। न चोदनातन्त्रम्। नापि पुरुषतन्त्रम्"[39] इति। एवं मनोवृत्यात्मकमेव ज्ञानं ब्रह्मवस्तु प्रकाशयति।

योगशास्त्रविदः अपि ज्ञानेनैव कैवल्यम् इति मतम् अङ्गीकुर्वन्ति। देहेन्द्रियादिसकलप्रपञ्चः अन्यः, पुरुषः आत्मा अन्यः इति सत्त्वपुरुषयोः भेदज्ञानं विवेकख्यातिनामकं अविद्यानिवृत्त्या मोक्षसाधकं भवति। उक्तञ्च – "विवेकख्यातिरविप्लवा हानोपायः"[40], "दर्शनस्य भावे बन्धकारणस्य अदर्शनस्य नाशः इत्यतः दर्शनं ज्ञानं कैवल्यकारणमुक्तम्"[41] इति। योगिभिः विवेकख्यातिः परवैराग्यशब्देनापि व्यपदिश्यते[42]। अनेन विवेकज्ञानात्मेकेन परवैराग्येन निर्बीजः असम्प्रज्ञातः समाधिः, कैवल्यमुपजायते। तदुक्तं – "ज्ञानस्यैव पराकाष्ठा वैराग्यम्। एतस्यैव हि नान्तरीयकं कैवल्यम्"[43] इति। वेदान्तिभिरिव योगिभिरपि विवेकख्यातिः परवैराग्यं वा पुरुषं स्वरूपप्रतिष्ठं कृत्वा अवसिताधिकारा स्वयं नष्टा भवति इति प्रतिपाद्यते। तदुक्तं – "यस्मादवसिताधिकारं सह कैवल्यभागीयैः संस्कारैश्चित्तं निवर्तते"[44] इति।

अपि च ज्ञानेन केवलम् अविद्या निवृत्तिमात्रं भवति, किन्तु आत्मनः स्वरूपं स्वयं प्रकाशते इति तु योगिजनाः प्रतिपादयन्ति। उक्तञ्च – "नात्र दर्शनं मोक्षकारणम्। अदर्शनाभावादेव बन्धाभावः स मोक्षः"[45] इति।

आयुर्वेदे अपि ज्ञानैकसाध्यः मोक्षः इति प्रदर्श्यते। यत्कृतकं तदनित्यमित्यनेन सर्वं कारणवत् अनित्यमेव। आत्मा तु उदासीनः निर्विकारी इति हेतोः न तस्य कार्यं कारणं विद्यते। अतः तदेकमेव नित्यं, तद्भिन्नं सर्वमनित्यम्। किन्तु लोके "अहं करोमि, मम एतत्" इत्यादिरूपेण यः व्यवहारः वर्तते स भ्रमः एव। योऽयम् आत्मनि कर्तृत्वादिभ्रमः आयुर्वेदे "स्वता" इति पदेन अभिधीयते। उक्तञ्च –

**"सर्वं कारणवत् दुःखमसत्त्वं चानित्यमेव च।**

**न चात्मकृतकं तद्धि तत्र चोत्पद्यते स्वता।।"** [46] इति।

इयं स्वता वेदान्ते अज्ञानमविद्या माया इत्यादिपदेन व्यवह्रियते। अयं भ्रमः अज्ञानं वा "आत्मा अकर्ता, अभोक्ता, सर्वव्यवहारप्रत्यस्तमितः। आत्मनि सर्वो व्यवहारः आविद्यकः" इत्यादिरूपेण आत्मस्वरूपज्ञानेन बाध्यते। इदं ज्ञानम् आयुर्वेदे "सत्या बुद्धिः" इति व्यपदिश्यते। तया बुद्ध्या जीवः संसारं तरति। उक्तञ्च –

**"यावन्नोत्पद्यते सत्या बुद्धिर्नेतदहं यया।**

**नैतन्ममेऽति विज्ञाय ज्ञः सर्वमतिवर्तते।।"**[47] इति।

सा सत्याबुद्धिः विद्या, सिद्धिः, मतिः, मेधा, प्रज्ञा, ज्ञानम् इत्यादिपदाख्या[48] इति अयुर्वेदिनः वदन्ति।

**मोक्षः तुरीयप्रलयः** – अयं ज्ञानात् अज्ञाननाशारुपः ब्रह्मभावः मोक्षः, तुरीयप्रलयः इत्यपि उच्यते। उक्तञ्च – "तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारनिमित्तकः सर्वमोक्षः"[49] इति।

---

[38]. सू.भा.1/1/4

[39]. सू.भा.1/1/4

[40]. यो.सू.2/26

[41]. व्यासभाष्यम् (यो.सू.) 2/23

[42]. यो.सू.1/16

[43]. व्यासभाष्यम् (यो.सू.) 1/16

[44]. व्यासभाष्यम् (यो.सू.) 1/51

[45]. व्यासभाष्यम् (यो.सू.) 2/23

[46]. चरक,शारीर.1/152

[47]. चरक.शारीर.1/153

[48]. "विद्या सिद्धिर्मतिर्मेधा प्रज्ञा ज्ञानं च सा मता"– चरक.शारीर.5/19

[49]. वे.परि.विषय.पृ 349

**मोक्षः न कर्मारभ्यः** – कर्मणां कामहेतुत्वेन, कामस्य च अविद्यात्मकत्वात्, विद्यया अविद्यात्मकं सर्वं नष्टं भवति इति प्रतिपादितम्। अतः अज्ञानरूपिणां कर्माणां ज्ञानरूपमोक्षारम्भकत्वम् असाध्यमिति ज्ञातमेव। अयमेव विषयः किञ्चिद्विस्तरेण प्रतिपाद्यते।

कर्माणां फलं उत्पाद्यं संस्कार्यं विकार्यम् आप्यं वा भवति। तदुक्तम् – "उत्पत्तिसंस्कारविकाराप्तयो हि फलं कर्मणः दृश्यते"[50] इति। किन्तु ब्रह्म नेदृशं भवति। ब्रह्म न उत्पाद्यं, नित्यत्वात्। यदुत्पन्नं तदनित्यं भवेत्, यथा मृदादिना उत्पन्नं घटादि अनित्यं दृष्टं लोके। ब्रह्म तु नित्यम्, अतः अनुत्पन्नम्। उक्तञ्च – "नित्यं विभुं सर्वगतम्"[51], "अजो नित्यः शाश्वतोऽयं पुराणः"[52] इति च। वेदान्तशास्त्राणि अपि इदन्तया ब्रह्म न प्रतिपादयन्ति, किन्तु अविद्याकल्पितं ज्ञातृ-ज्ञेय-ज्ञानभेदं निराकुर्वन्ति। अतः शास्त्रेण ब्रह्मज्ञानम् उत्पद्यते इति तस्य अनित्यत्वम् न आपद्यते। उक्तञ्च- "यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम्"[53], "न दृष्टेः द्रष्टारं पश्येः, न विज्ञातेः विज्ञातारं विजानीयाः"[54] इति। आचार्याः अपि – "न हि शास्त्रं इदंतया विषयभूतं ब्रह्म प्रतिपिपादयिषति। किं तर्हि प्रत्यगात्मत्वेन अविषयतया प्रतिपादयत् अविद्याकल्पितं वेद्यवेदयितृवेदनादिभेपनयति...। अतः अविद्या-कल्पित-संसार-निवर्तनेन नित्य-मुक्त-आत्मस्वरूप-समर्पणात् न मोक्षस्य अनित्यत्वदोषः"[55] इति प्रतिपादयन्ति। अतः एव ब्रह्मभावः मोक्षः न उत्पाद्यः। नापि विकार्यं ब्रह्म, नित्यत्वादेव। लोके च दध्यादि दुग्धादीना विकार्यं नित्यं न दृष्टम्। उक्तञ्च – "अव्यक्तोऽयम् अचिन्त्योऽयम् अविकार्योऽयमुच्यते"[56] इति। अतः न विकार्यः मोक्षः। न वा आप्यः ब्रह्मभावः मोक्षः, सर्वगतत्त्वात् स्वरूपत्वाच्च। यत् स्वस्मात् भिन्नं देशान्तरे वर्तते तत् प्राप्तुं शक्यं, यथा स्वभिन्नं फलादि। ब्रह्म तु सर्वगतम्, आकाशवत्। उक्तञ्च – "आकाशशरीरं ब्रह्म"[57], "विभुं सर्वगतं सुसूक्ष्मम्"[58] इति। ब्रह्म न वा संस्कार्यम्, अनाधेयातिशत्वात्। "संस्कारो नाम संस्कार्यस्य गुणाधानेन वा स्याद्दोषापनयनेन वा"[59] इति आचार्याः। ब्रह्मणि अव्यये निर्गुणे निष्कले शुद्धे, न केऽपि गुणाः दोषाः वा अधेयाः अपनेयाः वा। उक्तञ्च – "साक्षी चेता केवलो निर्गुणश्च"[60], "अनश्नन्नन्यः अभिचाकशीति"[61], "शुद्धम् अपापविद्धम्"[62] इति। अतः ब्रह्मभावः मोक्षः न संस्कार्यः। मोक्षस्य उत्पत्त्याद्यभावम् आचार्याः स्पष्टयन्ति – "उत्पत्त्यादिफलविपरीतश्च मोक्षः"[63] इति। एवं कर्मणा यदारभ्यते तत् उत्पन्नं, संस्कार्यं, विकार्यं, आप्यं वा भवेत्। ब्रह्म तु एतद्भिन्नम् इत्यतः, स्वस्वरूप-ब्रह्मभावारूपः मोक्षः अपि कर्मभ्यः नैव आरभ्यते। किञ्च कर्मारभ्यस्य स्वर्गस्य सुखस्वरूपत्वे अपि न तस्य मोक्षत्वम्। "यत्कृतकं तदनित्यम्" इति व्याप्तेः कर्मभ्यः यदारभ्यते तदनित्यमेव भवेत्। मोक्षस्तु नित्यः प्रतिपादितः। अतः कर्मभ्यः आरभ्यः स्वर्गः न मोक्षः। स्वर्गस्य अनित्यत्वं च- "यद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते"[64] इत्यनेन स्पष्टम्।

**मोक्षसाधनानि**

**श्रवण-मनन-निदिध्यासनानि** –

---

50. तै.भा.शीक्षा.11/4
51. मुं.उ.1/6
52. भ.गी.2/20
53. केन.उ.2/3
54. बृ.उ.3/4/2
55. सू.भा.1/1/4
56. भ.गी.2/25
57. तै.उ.1/6/2
58. मुं.उ.1/1/6
59. सू.भा.1/1/4
60. श्वेत.उ.6/11
61. मुं.उ.3/1/1
62. ईश.उ.8
63. तै.उ.शीक्षा.11/4
64. छां.उ.8/1/6

श्रवणमनन-निदिध्यासनसंस्कृतं मन: आत्मज्ञाने साधनं भवति । बृहदारण्यके "आत्मा वा अरे द्रष्टव्य:" इति आत्मदर्शनमारभ्य "श्रोतव्यो मन्तव्यो निदिध्यासितव्य:"[65] इति श्रवणमनननिदिध्यासानाम् आत्मदर्शनसाधनत्वेन निर्देश: कृत:। भाष्ये अपि - "एवं हि असौ दृष्टो भवति श्रवणमनननिदिध्यासनसाधनै: निर्वर्तितै:"[66] इति त्रयाणामपि अनुष्ठानम् आत्मदर्शनाय करणीयमिति उपदिष्टं भवति। किन्तु आत्मज्ञानं न चोदनातन्त्रं किन्तु वस्तुतन्त्रम् इति प्राक् प्रतिपादितम्। एवं सति "आत्मा वा अरे द्रष्टव्य: श्रोतव्य:" इत्यादिचोदनानां का गति: इति सन्देह: न कार्य:। न एतानि साक्षात् आत्मदर्शनाय उपदिष्टानि साधनानि, किन्तु बहिर्मुखस्य साधकस्य स्वाभाविककार्यकरणप्रवृत्ते: विमुखीकरणार्थानि। उक्तञ्च - "आत्मा वा अरे द्रष्टव्य: श्रोतव्य इत्यादीनि विधिच्छायानि वचनानि, स्वाभाविकप्रवृत्तिविमुखीकरणार्थानि इति ब्रूम:"[67] इति। एवं श्रवणादीनि सांसारिकप्रवृत्ते: विमुखीकरणेन अन्त:करणसंस्कारद्वारा आरात् आत्मदर्शनार्थानि इति विज्ञेयम्।

योगदर्शनेऽपि श्रवण-मनन-निदिध्यासनानां मोक्षसाधकत्वम् अङ्गीक्रियते। श्रवणादीनामनुष्ठानेन योगी त्रिप्रकारका: प्रज्ञा: प्राप्य, ताभ्य: व्युत्थानसंस्कारान् निरुध्य निर्बीजसमाधिं योगमाप्नोतीति उपदिश्यते। उक्तञ्च व्यासभाष्ये-

**"आगमेनानुमानेन ध्यानाभ्यासरसेन च।**

**त्रिधा प्रकल्पयन्प्रज्ञां लभते योगमुत्तमम्।।** "[68] इति।

तद्व्याख्याने तत्त्ववैशारद्याम् आगमानुमान-ध्यानरसाभ्यासानां श्रवण-मनन-निदिध्यासन-अपरपर्यायत्वं प्रपञ्चितम्। तथा च दर्शितम् - "आगममिति वेदविहितं श्रवणमुक्तम्। अनुमानेनेति मननम्। ध्यानं चिन्ता। तत्राभ्यास: पौन:पुन्येनानुष्ठानम्। तस्मिन्रस: आदर:। तदनेन निदिध्यासनमुक्तम्"[69] इति। किञ्च वेदविहितमति पदेन औपनिषदमेव श्रवणादिकं योगिभि: मोक्षसाधनत्वेन प्रतिपादितमित्यपि अवगम्यते। सम्प्रति श्रवणादय: निरूप्यन्ते।

**श्रवणम् –**

श्रवणं नाम सर्वेषां वेदान्तानाम् अद्वितीये ब्रह्मणि एव तात्पर्यनिश्चयाय अपेक्षिता मानसी क्रिया। उक्तं - "श्रवणं नाम वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूला मानसी क्रिया"[70] इति। इदं च श्रवणं मुमुक्षुणा आदौ कार्यम्। अद्वितीये ब्रह्मणि तात्पार्यावधारणं षड्विधतात्पर्यलिङ्गै: क्रियते। उक्तञ्च - श्रवणं नाम षड्विधलिङ्गै: वेदान्तानाम् अद्वितीये ब्रह्मणि तात्पर्यावधारणम्"[71] इति। तानि च उक्तानि -

**"उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।**

**अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये।।** "[72] इति।

**उपक्रम: उपसंहार: च** - प्रकरणप्रतिपाद्यस्य अर्थस्य तदाद्यन्तयो: उपपादनम्[73]। यथा छान्दोग्ये षष्ठाध्याये प्रकरणप्रतिपाद्यस्य अद्वितीयब्रह्मण: "एकमेवाद्वितीयम्"[74] इति उपक्रम:, "ऐतदात्म्यमिदं सर्वम्"[75] इति तस्य एव उपसंहार: कृत:।

**अभ्यास:** - प्रकरणप्रतिपाद्यस्य वस्तुन: तन्मध्ये पौन:पुन्येन प्रतिपादनम् अभ्यास:[76]। यथा तत्रैव छान्दोग्ये नवकृत्व: "तत्त्वमसि" इति अद्वितीयब्रह्मण: उपदेशस्य पुनरावर्तनम्।

**अपूर्वता** - प्रकरणप्रतिपाद्यस्य अद्वितीयस्य वस्तुन: प्रमाणान्तर-अविषयीकरणम्[77]। उपनिषदतिरेकेन कुत्रापि अद्वीतीयं ब्रह्मवस्तु न अवगम्यते। आगममात्रवेद्यं हि तत्।

---

65. बृ.उ.2/4/5
66. बृ.भा.2/4/5
67. सू.भा.1/1/4
68. व्यासभाष्यम् (यो.सू.) 1/48
69. तत्त्ववैशारदी (यो.सू.) 1/48
70. वे.परि प्रयोजन.पृ 391
71. वेदान्तसार: 182
72. वेदान्तसार: 284
73. वेदान्तसार: 185
74. छां.उ.6/2/1
75. छां.उ.6/8/7
76. वेदान्तसार: 186

**फलम्** - प्रकरणप्रतिपाद्यस्य आत्मज्ञानस्य तदुनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनम्[78]। यथा "आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये"[79] इति अद्वितीयब्रह्मज्ञानस्य मोक्षः फलम्। **अर्थवादः** – प्रकरणप्रतिपाद्यस्य अर्थस्य तत्र तत्र प्रशंसनम्[80]। यथा छान्दोग्ये एव "उत तमादेशमप्राक्ष्यः, येनाश्रुतं श्रुतं भवति, अमतं मतम्, अविज्ञातं विज्ञातम्"[81] इति अद्वितीयब्रह्मणः प्रशंसा।

**उपपत्तिः** - प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः[82]। यथा तत्रैव "यथा सोम्य, एकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात्, वाचारम्भणं विकारो नामधेयम्, मृत्तिकेत्येव सत्यम्"[83] इति सर्वकारणस्य ब्रह्मणः सत्यत्वख्यापनार्था युक्तिः प्रदर्शिता।

एवम् उपक्रमादि-षड्विधतात्पर्यनिर्णायकलिङ्गैः छान्दोग्ये षष्ठाध्याये अद्वितीयं ब्रह्म एव तात्पर्येण प्रतिपादितम् इति निर्णयः श्रवणम् उच्यते। एवमन्यत्रापि वेदान्तशास्त्रेषु योजनीयम्। "तत्तु समन्वयात्"[84] इति सूत्रयता बादरायणः सर्वेषां वेदान्तानामद्वितीये ब्रह्मणि एव तात्पर्यम् इति ख्यापयति। आचार्याः अपि – "तस्मात् अहं ब्रह्मास्मि इत्येतदवसानाः एव सर्वे विधयः सर्वाणि चेतराणि प्रमाणानि"[85] । श्रवणं तु आचार्योपदेशतः आगमोपदेशतश्च सिद्ध्यति। उक्तञ्च – "श्रोतव्यः पूर्वं आचर्यतः आगमतश्च"[86], इत्थं वाक्यैः तदर्थानुसन्धानं श्रवणं भवेत्"[87], "आचार्यवान् पुरुषो वेद"[88]

**"तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**

**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनः तत्त्वदर्शिनः॥ "**[89] इति।

**मननम् –**

आचार्योपदेशेन आगमेन च अवधारिते अद्वितीये ब्रह्मणि, प्रमाणान्तरविरोधः स्यात्। तेषां विरोधानां निरासाय अपेक्षिता तर्कात्मक-मानसी क्रिया मननम् उच्यते। उक्तञ्च – "मननं नाम शब्दावधारिते अर्थे मानान्तरविरोधशङ्कायां तन्निराकरणानुकूल-तर्कात्मक-ज्ञानजनको मानसो व्यापारः"[90] इति। इदं च मननं श्रवणानन्तरं कार्यम्। उक्तञ्च – "पश्चात् मन्तव्यस्तर्कतः"[91] इति। अन्यत्रापि – "युक्त्या सम्भावितत्त्वानुसन्धानं मननं तु तत्"[92], "मननं तु श्रुतस्य अद्वितीयवस्तुनः वेदान्तानुगुणयुक्तिभिः अनवरतम् अनुचिन्तनम्"[93] इति प्रातिपादितम्।

**निदिध्यासनम् -**

---

77. वेदान्तसारः 187
78. वेदान्तसारः 188
79. छां.उ.6/14/2
80. वेदान्तसारः 189
81. छां.उ.6/1/2
82. वेदान्तसारः 190
83. छां.उ.6/1/4
84. ब्र.सू.1/1/4
85. सू.भा.1/1/4
86. बृ.भा.2/4/5
87. पं.दशी.1/53
88. छां.उ.6/14/2
89. भ.गी.4/34
90. वे.परि.प्रयोजन. पृ 391
91. बृ.भा.2/4/5
92. पं.दशी.1/53
93. वेदान्तसारः 191

© 2018 IJSRSET | Volume 4, Issue 1, January-February-2018
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 1797-1827

"ततो निदिध्यासितव्यो निश्चयेन ध्यातव्य:"[94] इति मननान्तरम् निदिध्यासनस्य अनुष्ठानं विहितम्। श्रवणेन अधिगते ब्रह्मणि तर्कत: मननेन, अद्वितीयब्रह्मविषये निश्चये सत्यपि, संसारवासनावशात् न तस्मिन् अव्यक्ते ब्रह्मणि अन्त:करणं स्थिरं भवति। किन्तु पौन:पुन्येन विषयेषु एव रतं भवति। अत: बाह्यविषयेभ्य: अपकृष्य आत्मविषये एव अन्त:करणस्य स्थिरीकरणाय अपेक्षिता मानसी क्रिया निदिध्यासनम् उच्यते। उक्तञ्च – "निदिध्यासनं नाम अनादिदुर्वासनया विषयेषु आकृष्यमाणचित्तस्य विषयेभ्यो अपकृष्य आत्मविषयक–स्थैर्यानुकूलो मानसो व्यापार:"[95], "विजातीय–देहादिप्रत्ययरहित–अद्वितीयवस्तु–सजातीयप्रत्ययप्रवाह: निदिध्यासनम्"[96]

**"ताभ्यां निर्विचिकित्सेऽर्थे चेतस: स्थापितस्य यत्।**

**एकतानत्वमेतद्धि निदिध्यासनमुच्यते॥"**[97] इति।

श्रवणमनननिदिध्यासनेषु श्रवणं प्रधानमिति विवरणाचार्याणां वाद:। श्रवणादनन्तरमनुष्ठेययो: मनननिदिध्यासनयो: श्रवणफलब्रह्मदर्शन–निर्वर्तकतया आरादुपकारकत्वमिति तेषां वाद:[98]। किन्तु "ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्"[99] इत्यादिश्रुते: निदिध्यासनमेव ब्रह्मसाक्षात्कारे साक्षात् हेतु:, वाचस्पतिमिश्रा: अपि इमं वादं पुरस्कुर्वन्ति। अत एव भक्तिरिति निदिध्यासनमेव उच्यते। भक्ते: लक्षणमुच्यते –

**"मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी।**

**स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते॥ "**[100] इति।

गीताभाष्येऽपि आचार्या: – "मयि समर्पितान्तरात्मा मद्भक्त:"[101] इति स्वरूपे ब्रह्मणि चित्तसमाधिं भक्तिं वदन्ति। प्रागेव स्वरूपानुसन्धानस्य निदिध्यासनत्वप्रतिपादनात्, तस्यैव मोक्षे साक्षात् साधनत्ववचनाच्च भक्तिरिति निदिध्यासनमेव उच्यते। उक्तञ्च विवेकचूडामणिभाष्ये चन्द्रशेखरभारतीभि: "स्वस्वरूपानुसन्धानमिति निदिध्यासनमुच्यते। तस्यैव साक्षात्कारं प्रति साक्षात् साधनत्वात्"[102] इति।

योगशास्त्रविद: भक्तिम् "ईश्वरप्रणिधानम्" इति शब्देन व्यपदिशन्ति। निर्विकारस्य ईश्वरस्य विषये भक्ति: चित्तसमाधिद्वारा कैवल्योपयोगी इति तेऽपि अङ्गीकुर्वन्ति। उक्तञ्च – "ईश्वरप्रणिधानाद्वा"[103] इति। प्रणव: ईश्वरस्य वाचक:[104], अत: ईश्वरप्रणिधानं प्रणवजपपूर्वकं करणीयमिति योगविधि:। उक्तञ्च – "तज्जपस्तदर्थभावनम्"[105] इति। तेन च अन्त:करणस्य व्याध्यादय: क्लेशा: नष्टा: भवन्ति, चित्तं च एकाग्रं भवति। एवं तस्य अभ्यासेन चित्तं समाहितं सत्, जीव: स्वरूपज्ञानं प्राप्नोति। उक्तञ्च– "तत: प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च"[106] इति।

**साधनचतुष्टयसम्पत्ति: -**

नित्यानित्यवस्तुविवेक: वैराग्यं षमादिषट्कसम्पत्ति: मुमुक्षुत्वं च आत्मज्ञानाय चत्वारि साधनानि अद्वैतदर्शने निरूप्यन्ते। ब्रह्मसूत्रेषु "अथाऽतो ब्रह्मजिज्ञासा"[107] इति सूत्रभाष्ये अथशब्दस्य आनन्तर्यार्थे निर्धारिते एतेषां चतुर्णां साधनानां सम्पत्त्युत्तरं ब्रह्मजिज्ञासा करणीया इति आचार्यै: उपदिश्यते। तदुक्तं – "तस्मात्किमपि वक्तव्यं, यदनन्तरं ब्रह्मजिज्ञासा उपदिश्यते इति। उच्यते – नित्यानित्यवस्तुविवेक: इहामुत्रार्थभोगविराग:

---

94. बृ.भा.2/4/5
95. वे.परि.प्रयोजन. पृ 391
96. वेदान्तसार: 192
97. पं.दशी.1/54
98. वे.परि.प्रयोजन. पृ 393
99. श्वेत.उ.1/3
100. विवेक.चू.32
101. गी.भा.9/31
102. विवेक.चू.भा.32
103. यो.सू.1/23
104. "तस्य वाचक: प्रणव:" – यो.सू.27
105. यो.सू.1/28, "प्रणवस्य जप: प्रणवाभिधेयस्य चेश्वरस्य भावनम्"– व्यासभाष्यम् (यो.सू.) 1/28
106. यो.सू.1/29
107. ब्र.सू.1/1/1

© 2018 IJSRSET | Volume 4, Issue 1, January-February-2018
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 1797-1827

शमादिसाधनसम्पत् मुमुक्षुत्वं च”[108] इति। एतेषां चतुर्णां ब्रह्मज्ञानसाधनत्वं च उच्यते आचार्यैः – “तेषु हि सत्सु, प्रागपि धर्मजिज्ञासायाः ऊर्ध्वं च शक्यते ब्रह्मजिज्ञासितुं ज्ञातुं च; न विपर्यये”[109] इति। एतेषां सम्पत्तावेव शिष्यः गुरुं समित्पाणिः उपसर्प्य श्रवणादीन् अनुतिष्ठति। तस्मात् ब्रह्मज्ञानाय एतेषां सम्पादनमत्यावश्यकम्। ब्रह्मज्ञानं च मोक्षः इति प्रागेव निरूपितम्। उक्तञ्च विवेकचूडामणौ –

**साधनान्यत्र चत्वारि कथितानि मनीषिभिः।**

**येषु सत्स्वेव सन्निष्ठा यदभावे न सिद्ध्यति।।** ”[110] इति।

ब्रह्मज्ञानाय साधनानि एतानि शरीरकल्पनया प्रशंस्यन्ते –

**“शिरो विवेकस्त्वत्यन्तं वैराग्यं वपुरुच्यते।**

**शमादयः षडङ्गानि मोक्षेच्छा प्राण उच्यते।।** ”[111] इति।

किञ्च एतेषां साधनानां मध्ये पूर्वपूर्वस्य उत्तरोत्तरहेतुत्वेन क्रमः समाश्रियते। तदुक्तं –

**“आदौ नित्य-अनित्यवस्तुविवेकः परिगण्यते।**

**इहामुत्रार्थफलभोगविरागः तदनन्तरम्।।**

**शमादिषट्कसम्पत्तिः मुमुक्षुत्वमिति स्फुटम्।**”[112] इति।

सम्प्रति प्रत्येकं साधनं संक्षेपेण वर्ण्यते।

**नित्यानित्यवस्तुविवेकः –** ब्रह्म एव सत्यं जगन्मिथ्या इति निश्चयः नित्यानित्यवस्तुविवेकः उच्यते। केवलं जगदनित्यमिति विनिश्चयमात्रेण वैराग्यं न सिध्यति, अनित्यत्वसुखस्यापि जीविभिः काम्यमानत्वात्। जगन्मिथ्येत्युक्ते मिथ्याभूतस्य वस्तुनः केनापि अकाम्यमानत्वात्, जगति वैराग्यं सिद्ध्यति। अतः वैराग्यस्य निश्चयेन उत्पत्तये ब्रह्म नित्यं जगदनित्यमिति अनुक्त्वा ब्रह्म सत्यं जगन्मिथ्येति विवेकः उक्तः। उक्तञ्च –

**“ब्रह्मसत्यं जगन्मिथ्येवंरूपो विनिश्चयः।**

**सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः।।** ”[113] इति।

**इहामुत्रार्थभोगविरागः –** अस्मदीय–शरीरादारभ्यः भुवनाधिपत्यक–हिरण्यगर्भशरीरपर्यन्तं सर्वस्मिन् अपि भोग्यवस्तुनि मिथ्याभूते अनिच्छा, 'कदापि ईदृशपदार्थसम्बन्धो माभूत्' इति असह्यता वैराग्यमुच्यते। तदुक्तं –

**“तद्वैराग्यं जुगुप्सा च दर्शनश्रवणादिभिः।**

**देहादि-ब्रह्मपर्यन्ते ह्यनित्ये भोग्यवस्तुनि।।** ”[114] इति।

उक्तञ्च गीताभाष्ये आचार्यैः – “वैराग्यं नाम दृष्टादृष्टभोगेषु दोषदर्शनाभ्यासात् वैतृष्ण्यम्”[115] इति। सर्वेऽपि भोगाः कर्मजन्यतया अनित्याः। श्रुतिरपि – "तद्यथेह कर्मचितो लोकः क्षीयते एवमेव अमुत्र पुण्यचितो लोकः क्षीयते”[116], "जानाम्यहं शेवधिरित्यनित्यं न ह्यध्रुवैः प्राप्यते हि ध्रुवं तत्"[117], "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन”[118], "ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति"[119],

---

108. सू.भा.1/1/1
109. सू.भा. 1/1/1
110. विवेक.चू.18
111. सर्ववेदान्त.249
112. विवेक.चू.19,20
113. विवेक.चू.20, 21
114. विवेक.चू.21,22
115. गी.भा.6/ 35
116. छां.उ.8/1/6
117. कठ.उ.2/10
118. मुं.उ.1/2/12
119. भ.गी.9/21

"आब्रह्म भुवनाल्लोका: पुनरावर्तिनोर्जुन" [120] इत्यादिवाक्यै: कर्मार्जितानां सर्वेषां भोगानां अनित्यत्वं वदति। अत: ऐहिकानां स्रक्चन्दनवनितादिविषयभोगानां कर्मजन्यतया अनित्यत्ववत्, आमुष्मिकाणाम् अमृतादिविषयभोगाणाम् अनित्यतया तेभ्य: नितरां विरति: सम्पादनीया। तेन च मन: शुद्धं सत् आत्मज्ञानजननयोग्यं भवति। उक्तञ्च गीतायां –

**"असंशयं महाबाहो मनो दुर्निग्रहं चलम्।**

**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।। "**[121] इति।

**शमादिषट्कसम्पत्ति:** - आत्मसाक्षात्काराय शमादय: उपाकारिण: भवन्ति । उक्तञ्च – तस्मादेवंवित् शान्तो दान्त उपरतस्तितिक्षु: समहितो भूत्वा आत्मन्येवात्मानं पश्यति"[122] इति। ते शमादय: संक्षेपेण निरूप्यन्ते। ते च षट् वेदान्तशास्त्रे निरूपिता:। बृहदारण्यकस्य काण्वशाखायां शमादय: पञ्च निरूपिता:। माध्यन्दिनशाखायां "समाहित:" इत्यस्मिन् स्थाने "श्रद्धावित्त:" इति उपदेश: कृत:। एकस्मिन् एव विषये श्रुतिषु यदि भेद: भवति, तदा "श्रुतीनाम् एकवाक्यता" सम्पादनाय "गुणोपसंहारनियमेन" एकत्र अनुक्त: अंश: अन्यत: स्वीक्रियते। आचार्या: अपि सूत्रभाष्ये गुणोपसंहारन्यायं प्रदर्शयन्ति[123]। अत: उभयशाखाप्रतिपादितानि षट्सङ्ख्याकानि शमादीनि स्वीकृतानि।

**शम:** - बाह्येन्द्रियव्यापारत: निवृत्ति: इति आचार्या:। उक्तञ्च – "शान्तो बाह्येन्द्रियव्यापारत: उपशान्त:" [124]। किन्तु अन्येषु प्रकरणग्रन्थेषु अन्त:करणस्य निग्रह: शम: उक्त:। निग्रह: इत्युक्ते न सर्वविषयेभ्य: निग्रह: अभिप्रेत:। अद्वितीयब्रह्म-प्रतिपादक-शास्त्रव्यतिरिक्तविषयेभ्य: सृक्-चन्दनादि-बाह्यविषयेभ्य: अन्त:करणस्य निग्रह: शम:। अन्यथा मोक्षसाधनानां "श्रवणादीनाम्" उपदेश: अनर्थक: स्यात्। उक्तञ्च – "शमस्तावत् श्रवणादिव्यतिरिक्तविषयेभ्य: मनसो निग्रह:"[125], "अन्तरिन्द्रियनिग्रह: शम:"[126],

**"विरज्य विषयव्रातात् दोषदृष्ट्या मुहुर्मुहु:।**

**स्वलक्ष्ये नियतावस्था मनसश्शम उच्यते।। "**[127] इति।

**दम:** - अन्त:करणस्य निग्रह: दम: इति आचार्या:। उक्तञ्च – "दान्तो अन्त:करणतृष्णातो निवृत्त:"[128] इति। अन्यत्र तु ब्रह्मव्यतिरिक्तविषयेभ्य: बाह्याणां दशेन्द्रियाणां निग्रह:। उक्तञ्च – "दम: बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्य: निवर्तनम्"[129], "बहिरिन्द्रियनिग्रह: दम:"[130],

**"विषयेभ्य: परावर्त्य स्थापनं स्वस्वगोलके।**

**उभयेषामिन्द्रियाणां स दम: परिकीर्तित:।। "**[131] इति।

यस्य इन्द्रियाणि संयतानि तस्य ज्ञानप्राकाश: भवति। गीतायां च संयतेन्द्रियस्य ज्ञानप्रसाद: भवति इति स्पष्टाक्षरै: उपदिष्टम्[132]। यदि बहिरिन्द्रियाणि निगृहीतानि तर्हि अन्त:करणं निश्चयेन प्रसन्नं भवति।

**उपरति:** - सर्वकर्मसंन्यास: उपरति: इति आचार्या:। उक्तञ्च – "उपरत: सर्वेषणाविनिर्मुक्त: संन्यासी"[133] इति। पुत्रैषणा वित्तैषणा लोकैषणा इति तिसृभ्य: एषणाभ्य: मुमुक्षु: उपरत: भवेत् इति वेदान्तोपदेश:। उक्तञ्च – "पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं

---

[120]. भ.गी.8/19
[121]. भ.गी.6/ 35
[122]. बृ.उ.4/4/23
[123]. सू.भा.2/2/7,19,20,26,58
[124]. बृ.भा.4/4/23
[125]. वेदान्तसार: 18
[126]. वे.परि.प्रयोजन. पृ 318
[127]. विवेक.चू.21.22
[128]. बृ.उ.4/4/23
[129]. वेदान्तसार: 19
[130]. वे.परि.प्रयोजन 318
[131]. विवेक.चू 22,23
[132]. भ.गी.4/39
[133]. बृ.उ.4/4/23

चरन्ति"[134]। "न्यास एवात्यरेचयत्"[135], "न कर्मणा न प्रजया त्यागेनैकेऽमृतत्त्वमानशुः"[136] इत्यादिश्रुतिषु सर्वकर्मभ्यः विरक्तस्य संन्यासिनः मोक्षोपदेशः श्रूयते। गीताभाष्ये अपि –"मुमुक्षोः सर्वकर्मसंन्यासविधानात्"[137] इति सर्वकर्मसन्यासविधानं मुमुक्षोः निर्दिष्टम्। अन्यप्राकारेणापि उपरतिः निरूप्यते। यथा शमदमादिभ्यः निगृहीतस्य मनसः बाह्येन्द्रियाणां च पुनः संसारवासनावशात् बाह्यविषयेषु रतिः स्यात्, तेभ्यः बाह्यविषयेभ्यः सर्वेन्द्रियाणां सर्वथा उपरमणम् उपरतिः इति प्रतिपादितम्। उक्तञ्च – "निवर्तितानां एतेषां तद्व्यतिरिक्तविषयेभ्यः उपरमणं उपरतिः अथवा विहितानां कर्मणां विधिना परित्यागः"[138], "विक्षेपाभावः उपरतिः"[139], "बाह्यानालम्बनं वृत्तेरेषोपरतिरुत्तमा"[140] इति। **अत्रेदमवधेयम्** - "न कर्मणा न प्रजया धनेन न त्यागेनैके अमृतत्त्वमानशुः"[141], "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति"[142] इति उपनिषद्वाक्येभ्यः, "नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति"[143] इत्यादि– स्मृतिवचनाच्च संन्यासिनः एव मोक्षाधिकारः इति उपरतिशब्देन कर्मसंन्यासं वदन्ति आचार्याः। अन्ये तु "कर्मणा एव संसिद्धिमास्थिता जनकादयः"[144] इत्यादिवचनाच्च गृहस्थानां जनकादीनां मुक्तिवाक्यमनुसृत्य संसारिणामपि मोक्षे अधिकारः भवेत् इति उपरतिपदेन विक्षेपाभावं प्रतिपादयन्ति[145]।

**तितिक्षा** – दुःखहेतूनां शीतोष्णादिद्वन्द्वानां प्रतीकारचिन्तां च विना सहनं तितिक्षा। उक्तञ्च–

**"सहनं सर्वदुःखानामप्रतीकारपूर्वकं।**
**चिन्ताविलापरहितं सा तितिक्षा निगद्यते।।"**[146],

"तितिक्षुः द्वन्द्वसहिष्णुः"[147], "तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता"[148], "शितोष्णादिद्वन्द्वसहनं तितिक्षा"[149] इत्यादिः।

**श्रद्धा** - लोके पुरुषः आप्तवाक्ये विश्वासाभावे तदनुसारेण कार्ये न प्रवर्तते, किमुत अतीन्द्रिये शास्त्रार्थे। अतः ब्रह्मजिज्ञासुना "ब्रह्मैव सत्यमन्यत् सर्वं मिथ्या" इत्यादिषु गुरुवाक्येषु, तदर्थप्रतिपादक–शास्त्रवाक्येषु च विश्वासः करणीयः, सा एव श्रद्धा उच्यते। उक्तञ्च –

**"शास्त्रस्य गुरुवाक्यस्य सत्यबुध्यवधारणा।**
**सा श्रद्धा कथिता सद्भिः यया वस्तूपलभ्यते।।"**[150],

"गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा"[151], "गुरुवेदान्तवाक्येषु विश्वासः श्रद्धा"[152] इत्यादिरूपेण। विना श्रद्धां शास्त्रे प्रवर्तनमेव न सिद्ध्यति इति दूरे एव अपास्तं ब्रह्मज्ञानम्। तदुक्तं गीतायां–

---

134. बृ.उ.4/4/22
135. ना.उ.2/78
136. ना.उ.2/12
137. गी.भा.3/1
138. वेदान्तसारः 21
139. वे.परि.प्रयोज.318
140. विवेक.चू.24
141. म.ना.उ.10/5
142. बृ.उ.4/4/22
143. भ.गी.18/49
144. भ.गी.3/20
145. अत्रोपरमशब्देन संन्यासोऽभिधीयते, तथा च संन्यासिनामेव श्रवणाधिकारः इति केचित्। अपरे तु उपरमशब्दस्य संन्यासवाचकत्वाभावात् विक्षेपाभावमात्रस्य गृहस्थेष्वपि सम्भवात्, जनकादेरपि ब्रह्मविचारस्य श्रूयमाणत्वात् सर्वाश्रमसाधारणं श्रवणादिविधानमाहुः – वे.परि.प्रयोज.पृ 398
146. विवेक.चू.25
147. बृ.भा.4/4/23
148. वेदान्तसारः 22
149. वे.परि.प्रयोजन. पृ 398
150. विवेक.चू.26

© 2018 IJSRSET | Volume 4, Issue 1, January-February-2018
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 1797-1827

**"अश्रद्धधाना पुरुषाः धर्मस्यास्य परन्तप।**

**अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि।।** "[153] इति।

"तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् श्रोत्रियं ब्रह्मनिष्ठम्"[154] इत्यादि उपनिषद्वाक्येभ्यः ब्रह्मज्ञानिनः गुरोः सकाशादेव आत्मज्ञानं प्राप्तुं शक्यम् इति उपदेशात्, तादृशगुरौ विश्वासं विना आत्मज्ञानं प्रातुम् अशक्यम्। किन्तु ये शास्त्रविधिं न जानन्ति तेषां श्रद्धा न भवति इत्यपि नास्ति नियमः। शास्त्राणि अजानन्तः अपि केवलं वृद्धव्यवारदर्शनेन एव श्रद्धया देवादीन् पूजयन्ति। अत एव अर्जुनः "ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः"[155] इति प्रश्नमपृच्छत् गीतायाम्। तत्र भगवान् श्रद्धायाः सात्त्विकराजसिकतामसिकभेदाः दर्शयति –

**"त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।**

**सात्त्विकीं राजसीं चैव तामसीं चेऽति तां श्रुणु।।** "[156] इति।

जीविनां स्वाभाविकी[157] या श्रद्धा, सा कार्यानुमेया एव। तत्र सात्त्विकश्रद्धावान् देवादीन् यजते। राजसिकश्रद्धावान् यक्षान् राक्षसान् पूजति। तामसश्रद्धावान् प्रेतान् भूतगणान् यजते। उक्तञ्च –

"**यजन्ते सात्त्विकाः देवान्यक्षरक्षांसि राजसाः।**

**प्रेतान् भूतगणाश्चैव यजन्ते तामसाः जनाः।।** "[158] इति।

तत्र सात्त्विकश्रद्धावतः अन्तःकरणशुद्ध्या ज्ञानप्रसादः भवति न अन्येषाम्। तदुक्तं भगवता – "श्रद्धावान् लभते ज्ञानम्"[159] इति।

**समाधानम् –**

**"यतो यतो निश्चरति मनश्चञ्चलमस्थिरं।**

**ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्।।** "[160]

इति गीतोक्तरीत्या सङ्कल्पविकल्पात्माकस्य चञ्चलस्य मनसः स्थिरीकरणे अथवा शमावस्थायां विशेषः प्रयत्नः विधेयः। अतः अध्यवसायात्मिकायाः बुद्धेः शुद्धे ब्रह्मणि स्थिरीकरणपूर्वकम् अन्तःकरणस्य सङ्कल्प-विकल्पात्मकाभावः समाधानमभिप्रेतम्। उक्तञ्च –

**"सम्यगास्थानं बुद्धेः शुद्धे ब्रह्मणि सर्वदा।**

**तत्सामाधानमित्युक्तं न तु चित्तस्य लालनम्।।** "[161],

"इन्द्रियान्तःकरणचलनरूपाद्व्यावृत्त्य एकाग्र्यरूपेण समाहितः"[162], "निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम्"[163], "चित्तैकाग्र्यं समाधानम्"[164] इति।

**मुमुक्षुत्वम् –** मायाकल्पितमात्रमयं कर्तृत्वभोक्तृत्वादिकुणकं संसारं स्वरूपज्ञानेन मोक्तुमिच्छा मुमुक्षा। तदुक्तं –

---

151. वेदान्तसारः 24
152. वे.परि.प्रयोजन.पृ 398
153. भ.गी.9/3
154. मुं.उ.1/2/12
155. भ.गी.17/1
156. भ.गी.17/2
157. शास्त्रविधि–अतिरिक्ता
158. भ.गी.17/4
159. भ.गी.4/39
160. भ.गी.6/26
161. विवेक.चू.27
162. बृ.भा.4/4/23
163. वेदान्तसारः 23
164. वे.परि.प्रयोजन. पृ 398

**“अहङ्कारादिदेहान्तान् बन्धान् अज्ञानकल्पितान्।**

**स्वस्वरूपावबोधेन मोक्तुमिच्छा मुमुक्षुता।।** ”[165] इति।

मुमुक्षुतायाः च दैवानुग्रहमात्रेण सम्भवः इति तस्याः दुर्लभत्वं शास्त्रेषु प्रतिपादितम्। तदुक्तं –

**“दुर्लभं त्रयमेवैतत् दैवानुग्रहहेतुकं।**

**मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः।।** ”[166] इति।

इयं तावत् मुमुक्षुता त्रिविधा मन्दा मध्यमा प्रवृद्धा चेति[167]। तत्र सांसारिक–वासना–लिप्तान्तःकरणनां मोक्षेच्छा मन्दा। सांसारिकेषु भोगेषु पौनःपुन्येन दोषदर्शनेन विधिवत् कर्मसंन्यासपूर्वकं ब्रह्मविचाराय गुरूपसदनोत्तरम्, अध्यात्मशास्त्रश्रवणेन जनिता मोक्षेच्छा मध्यमा। यथा यथा तीव्रतरं वैराग्यं शमादीन् च अभ्यसति, गुरोः अनुग्रहं च प्राप्नोति तदा मोक्षादन्यं न किञ्चत्कामयते, सा प्रवृद्धा मुमुक्षुता। तदा एव शमादयः अर्थवन्तः भवन्ति। तया तु प्रवृद्धया मोक्षेच्छया एव मुख्याधिकारी भूत्वा आशु फलं मोक्षं प्राप्नोति। तदुक्तं –

**“मन्दमध्यमरूपाणि वैराग्येण शमादिना।**

**प्रसादेन गुरोस्सेयं प्रवृद्धा सूयते फलम्।।**

**वैराग्यं च मुमुक्षुत्वं तीव्रं यस्य तु विद्यते।**

**तस्मिन्नेवार्थवन्तः स्युः फलवन्तः शमादयः।।** ”[168] इति।

**सगुणोपासनम् -**

सगुणोपासनमपि मोक्षसाधनमिति वेदान्तेषु उपदिश्यते। शास्त्रोपदिष्टरीत्या शास्त्रप्रतिपादितैकार्थविषयः विच्छित्तिरहितः अन्तःकरणवृत्तिप्रवाहः उपासनम्। तदुक्तं शाङ्करभाष्ये – “उपासनं च यथाशास्त्रं तुल्यप्रत्ययसन्ततिः असङ्कीर्णा च अतत्प्रत्ययैः शास्त्रोक्तालम्बनविषया च”[169] इति। ये निर्गुणं परं ब्रह्म साक्षात्कर्तुम् असमर्थाः मन्दाः तेभ्यः सगुणोपासनं विधीयते। वदति च कल्पतरुकारः –

**“निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः।**

**ये मन्दास्तेनुकम्प्यन्ते सविशेषनिरूपणैः।।"**[170] इति।

उपासनानां चित्तशुद्धिः फलम्। चित्तशुद्धिद्वारा परम्परया ब्रह्मानुभवहेतुत्वम्। उक्तञ्च –

"**वशीकृते मनस्येषां सगुणब्रह्मशीलनात्।**

**तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनम्।।"**[171],

“सगुणोपासनमपि चित्तैकाग्र्यद्वारा निर्विशेष–ब्रह्मसाक्षात्कारे हेतुः”[172] “तपसा कल्मषं हन्ति”[173] इति।

किञ्च उपासनेषु यत्प्रतीकमवलम्ब्यते, तदुपास्येन वस्तुना निकृष्टं भवेत्। यतो हि निकृष्टे उत्कृष्टदृष्ट्या उपासनं क्रियते। उक्तञ्च शारीरकभाष्ये – “उत्कृष्टदृष्टिर्हि निकृष्टे अध्यवसितव्या”[174] इति। तदा एव उत्कृष्टं फलमवाप्यते उपासकः। ब्रह्मणः उपासनेषु अपि निकृष्टे

---

165. विवेक.चू.28
166. विवेक.चू.3
167. विवेक.चू.भा. 28
168. विवेक.चू.29,30
169. तै.भा.शीक्षा.3/4
170. कल्पतरुव्याख्यानम् (भामती) 1/1/20
171. कल्पतरुव्यख्यानम् (भामती) 1/1/20
172. वे.परि.प्रयोजन.पृ 399
173. मनुस्मृतिः 12/104
174. सू.भा.4/1/5

© 2018 IJSRSET | Volume 4, Issue 1, January-February-2018
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 1797-1827

आदित्यादौ परमोत्कृष्टब्रह्मदृष्ट्या उपासनं क्रियते। अत एव "ब्रह्मदृष्टिरुत्कार्षात्" [175] इति सूत्रयति बादरायण:। आचार्या: च "यत्प्रतीकेषु तद्दृष्ट्यध्यारोपणं प्रतिमादिश्विव विष्णवादीनाम्"[176] इति प्रतिपादयन्।

उपासक: आसीन: एव उपासनं कुर्यात्। सूत्रितं च "आसीन: सम्भवात्"[177] इति। तिष्ठत: देहधारणे मन: व्याप्रियते। शयानस्य अकस्मात् निद्राप्राप्ति: स्यात्। अत: चित्तैकाग्र्याय आसीन: एव उपासनां कुर्यात्। किञ्च उपासनासु दिग्देशकालादिनियामा: न सन्ति। उपासनायां चित्तैकाग्र्यमावश्यकम्। तद्यत्र सम्भवति तादृश: देश: काल: दिग्वा उपासकेन ग्राह्य:। तदुक्तं ब्रह्मसूत्रेषु – "यत्तेकाग्रता तत्राविशेषात्"[178] इति। तत्र सगुणब्रह्मोपासका: चित्तशुद्धिद्वारेण हिरण्यगर्भलोकं प्राप्नुवन्ति। उक्तञ्च विद्यया देवलोक:"[179] इति। तत्र एव श्रवणाद्यनुष्ठानेन हिरण्यगर्भेण सह मोक्षं प्राप्नुवन्ति। उक्तञ्च – "सगुणोपासकानां चार्चिरादिमार्गेण ब्रह्मलोकं गतानां तत्रैव श्रवाणादुत्पन्नतत्त्वसाक्षात्काराणां ब्रह्मणा सह मोक्ष:"[180] इति। हिरण्यगर्भ: कार्यब्रह्मा ईश्वर: ब्रह्मलोके स्थित: अपरोक्षब्रह्मज्ञानवान् जीवन्मुक्त:, ब्रह्माण्डस्य अधिकारी, ब्रह्मलोकाध्यक्ष:। स: उपासनया अर्चिरादिमार्गेण तल्लोकं गतानाम् उपासकानां कृते श्रवणादिमार्गेण ज्ञानोपदेशं करोति। तस्य च प्रागनुष्ठित–उत्कृष्टोपासनाबलात् प्राप्त: ब्रह्माण्डाधिकार: एव प्रारब्धकर्म। प्रारब्धकर्म तु उपभोगेनैव शाम्यति इत्यत: उपभोगेन ब्रह्माण्डाधिकाररूप–प्रारब्धकर्मविलये सति जीवन्मुक्त: ईश्वर: विदेहमुक्तिं प्राप्य ब्रह्मभावमाप्नोति। तदा तल्लोकवासिनामपि ईश्वरेण सह एव विदेहमोक्ष:। अयं च मोक्ष: प्राकृतप्रलय: इत्युच्यते।उक्तञ्च –

**"ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे।**

**परस्यान्ते कृतात्मान: प्रविशन्ति परं पदम्।।** "[181] इति।

**वेदविहितानि कर्माणि** –

कर्माणि अपि वेदविहितानि चित्तशुद्धिद्वारा परम्परया मोक्षसाधनानि भवन्ति। तथा च उक्तं– "अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते"[182], "तमेतमात्मानं वेदानुवचनेन ब्राह्मणा: विविदिषन्ति यज्ञेन"[183] इति। किन्तु ज्ञानकर्मणो: परस्परं वैरुध्यमस्ति। ज्ञानेन पुर्वोक्तरीत्या सर्वाणि कर्माणि नश्यन्ति। उक्तञ्च– "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"[184] इति। तथापि चित्तशुद्ध्यर्थं क्रियमाणानि कर्माणि अवश्यं मोक्षसाधनानि भवन्ति। उक्तञ्च – "अनुशासनश्रुते: पुरुषसंस्कारार्थत्वात्। संस्कृतस्य हि विशुद्धसत्त्वस्य आत्मज्ञानम् अञ्जसैवोत्पद्यते"[185], "कर्मभि: संस्कृता हि विशुद्धात्मान: शक्नुवन्त्यात्मानम् उपनिषत्प्रकाशितम् अप्रतिबन्धेन वेदितुम्"[186] इति।

अत: अवश्यं ब्रह्मविज्ञानात् प्राक् चित्तशुद्ध्यर्थं श्रौतस्मार्तकर्मानुष्ठानं संन्यासेतराश्रमै: कार्यम्। उक्तञ्च – "वेदमनूच्येत्यादि–कर्तव्यता–उपदेशतारम्भ: प्राग्ब्रह्मविज्ञानात् नियमेन कर्तव्यानि श्रौतस्मार्तकर्माणीत्येवमर्थ:"[187] इति।

**योगाङ्गानुष्ठानं, योगाशास्त्रप्रतिपादिता: अन्ये च मोक्षोपाया:**

**यमादीनि अष्टाङ्गानि -**

यम–नियम–आसन–प्राणायाम–प्रत्याहार–धारणा–ध्यान–समाधय:[188] योगाङ्गानि अष्टौ योगशास्त्रे प्रतिपादितानि। मुमुक्षुणा ज्ञानप्रसादाय एतानि अवश्यम् अनुष्ठेयानि इति तत्र प्रतिपादितम्। उक्तञ्च – "योगाङ्गानुष्ठानात् अशुद्धिक्षये ज्ञानदीप्ति: आविवेकख्याते:"[189] इति। यथा यथा

---

175. ब्र.सू.4/1/5
176. सू.भा.4/1/5
177. ब्र.सू.4/1/7
178. ब्र.सू.4/1/11
179. बृ.उ.1/5/16
180. वे.परि.प्रयोजन, पृ 400
181. वे.परि.विषय, पृ 346 – अत्र उद्धृतं वेदवाक्यम्
182. ईश.उ.8
183. बृ.उ.4/4/22
184. मुं.उ.2/2/9
185. तै.भा.शीक्षा.11/4
186. बृ.भा.4/4/22
187. तै.भा.1/10/1
188. यो.सू.2/29

© 2018 IJSRSET | Volume 4, Issue 1, January-February-2018
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 1797-1827

एतेषामनुष्ठानं क्रियते तथा तथा सर्वेऽपि क्लेशाः नष्टाः भवन्ति। क्लेशनाशात् स्वयं ज्ञानप्रसादः सिध्यति[190]। वेदान्तशास्त्रेऽपि यमादीनि अष्टाङ्गानि अनुष्ठेयत्वेन उपदिष्टानि। उक्तञ्च–

**"अष्टावङ्गानि योगस्य यमो नियम आसनम्।**

**प्राणायामस्तथा प्रत्याहारश्चापि च धारणा॥"**

**ध्यानं समाधिरित्येव निगदन्ति मनीषिणः।"**[191] इति।

गीतायां भगवान् "ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्"[192] इति योगिनां चित्तशुद्धये यमनियमादिलक्षणः एव कर्मयोगः विहितः। तदुक्तं आचार्यैः "सर्वकर्मसंन्यासविलक्षणात् सत्येव कर्तृत्वविज्ञाने कर्मैकदेशविषयात् यमनियमादिसहितत्वेन च दुरनुष्ठेयात्" [193] इति। भामत्यां यमादीनामनुष्ठानं विना अविद्योच्छेदः असाध्यः उच्यते – "न जातु योगशास्त्रविहितंयम-नियमादि-बहिरङ्गम् उपायम् अपहाय अन्तरङ्गं च धारणादिकमन्तरेण औपनिषदात्मतत्त्वसाक्षात्कार उदेतुमर्हति"[194] इति। अतः अविद्याप्रत्युपस्थापित-कर्मरूप-अशुद्धिक्षयाय यमादीनाम् अनुष्ठानं वेदान्तेऽपि विधीयते। अत्र अशुद्धिक्षयः इति न केवलं दुष्कृतानामेव क्षयः इष्टः, किन्तु सुकृतदुष्कृतयोः उभयोः क्षयः विवक्षितः। यतः मोक्षं प्रति सुकृतमपि बाधकमेव। अतः योगाङ्गानामनुष्ठनसहित-विद्यया मोक्षबाधकयोः सुकृत-दुष्कृतोभयोः अपि क्षयः सिद्ध्यति[195]। श्रवणादीनामनुष्ठानात् प्राक् सत्त्वशुद्धये यमादीनामनुष्ठानमवश्यं विधेयम्[196]। अतः मुमुक्षोः श्रवणमनादिभिः सह योगाङ्गानां मोक्षपरिकरत्वेन ग्रहणं वेदान्तशास्त्रे क्रियते[197]। यमादिनामनुष्ठानं विना श्रवणादयः साक्षात्कारहेतवः न भवन्ति। उपासनानामनुष्ठानात् प्रागपि उपासकेन यमादिनामनुष्ठानमवश्यं करणीयं, सत्त्वशुद्धिं विना उपासनानुष्ठानस्य असम्भवात्। अतः यमादीनां देवलोक-प्राप्तिसाधनत्वमपि प्रतिपाद्यते। उक्तञ्च – "यमनियमाद्यनुष्ठानसहितया विद्यया उत्तरेण मार्गेण पर्यङ्कस्थ-ब्रह्मप्राप्त्युपायत्व-श्रवणात्। अप्रक्षीणपाप्मनश्च तदनुपपत्तेः"[198] इति। अत एव "सत्य-ब्रह्मचर्य-अहिंसा-अपरिग्रह-त्याग-संन्यास-शौच-सन्तोष-आमायावित्वाद्यनेक-यम-नियमानुगृहीतःस एवं यावज्जीवव्रतधारणः" इति ओङ्कारोपासकस्य यमादीनामनुष्ठानमुक्तं प्रश्नभाष्ये[199]। परिव्राजकानामपि यमादीनामनुष्ठानं वेदान्तेषु विधीयते[200]। मोक्षसाधकाः यमनियमादयः गीतायाः षोडशे अध्याये दैवीसम्पदः इति निरूपिताः। तदुक्तमाचार्यैः – "तत्र संसारमोक्षाय दैवी प्रकृतिः"[201] इति। दैवीसम्पदः उक्ताः –

**"अभयं सत्त्वसंशुद्धिः ज्ञानयोगव्यवस्थितिः।**

**दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥",**

**"अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।**

---

189. यो.सू.2/28

190. "तेषामनुष्ठानात् पञ्चपर्वाणो विपर्ययस्य क्षयो नाशः। तत्क्षये सम्यग्ज्ञानस्य अभिव्यक्तिः"- व्यासभाष्यम् (यो.सू.) 2/28

191. सर्ववेदान्तसार.910,911

192. भ.गी.3/3

193. गी.भा.5/1

194. भामती (सू.भा).2/1/3

195. "ततः पतिते देहेयमनियमविद्याभ्यासाम्तकस्य सुकृतदुष्कृतक्षयहेतोः पुरुषयत्नस्य इच्छातोऽनुष्ठानानुपपत्तेः अनुपपत्तिरेव तद्धेतुकस्य सुकृतदुष्कृतक्षयस्य स्यात्; तस्मात् पूर्वमेव साधकावस्थायां छन्दतोऽनुष्ठानं तस्य स्यात्, तत्पूर्वकं च सुकृतदुष्कृतहानम् इति द्रष्टव्यम्" – सू.भा.3/3/28

196. "यमनियमादिविशुद्धसत्त्वस्येहैव श्रवणादिभिर्विद्योत्पादात्" – भामती (सू.भा.) 3/3/29

197. "परिकरः सामग्री सम्यग्ज्ञानस्ययमनियादिः श्रवणमननादिश्च"- भामती (सू.भा.) 2/2/23

198. भामती (सू.भा.) 3/3/27

199. प्र.भा.5/1

200. एकत्वप्रत्ययविधिजनितेन प्रत्ययेन विधिनिमित्तभेद-प्रत्ययस्य-उपमर्दितत्त्वात्यमनियमाद्यनुत्पत्तिः परिव्राजकस्येति चेत्, न, बुभुक्षादिना एकत्वप्रत्ययात्प्रच्यावितस्योपपत्तेः, निवृत्त्यर्थत्वात्"- छां.भा.2/23/1

201. गी.भा.16/1

**दया भूतेष्वलोलुप्तं मार्दवं ह्रीरचापलम्॥ ",**
**"तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।**
**भवन्ति सम्पदं दैवीमभिजातस्य भारत॥ "**[202] इति।

सम्प्रति यमादयः संक्षेपेण योगवेदान्तशास्त्रसमन्वयेण विवृयन्ते।

**यमाः -** यमाः पञ्च-सङ्ख्याकाः "अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहाः"[203] योगसूत्रेषु प्रतिपादिताः। सर्वथा सर्वदा सर्वभूतानामनभिद्रोहः **अहिंसा**। **सत्यं** यथार्थं वाङ्मनसोः। सत्याचरणे यदि जीविनाम् उपघातः स्यात् तर्हि तत् पापमेव भवति। अतः सत्यकथनकाले सर्वभूतहितं सत्यमेव ब्रूयात्। अशास्त्रपूर्वकं द्रव्याणादम् अस्वीकारः **अस्तेयम्**। **ब्रह्मचर्यं** गुप्तेन्द्रियस्य उपस्थस्य संयमः। विषयेषु दोषदर्शनात् तेषु उपेक्षा **अपरिग्रहः**। एतेषामनुष्ठानं जातिदेशकालसमय-अवच्छेदेन क्रियते। उदाहरणार्थं मत्स्यबन्धकस्य मत्स्येष्वेव नान्यत्र हिंसा, जात्यवच्छिन्ना अहिंसा। एवं जात्यादि-अनवच्छेदेन अहिंसादीनामाचरणं "महाव्रतम्" उच्यते। उक्तञ्च -"जातिदेशकालसमयान् अनवच्छिन्नाः सार्वभौमा महाव्रतम्"[204] इति। ब्रह्मचिन्तनद्वारा इन्द्रियाणां संयमः यमः इति वेदान्तदृष्ट्या यमस्य सामान्यलक्षणम्। उक्तञ्च -

**"सर्वं ब्रह्मेति विज्ञानादिन्द्रियग्रामसंयमः॥**
**यमोऽयमिति सम्प्रोक्तोऽभ्यसनीयो मुहुर्मुहुः।"**[205] इति।

हठयोगे दशप्रकाराः यमाः उक्ताः। तदुक्तं -

**"अहिंसा सत्यमस्तेयं ब्रह्मचर्यं क्षमा धृतिः।**
**दयार्जवं मिताहारः शौचं चैव यमा दश॥ "**[206] इति।

एषु मिताहारः एव अत्यन्तं प्रधानः उच्यते - "लघ्वाहारस्तु तेष्वेको मुख्यो भवति नापरे"207 इति। गीताभाष्यव्याख्याने अपि यमाः दश निर्दिष्टाः। तथा च उक्तं -

**"आनृशंस्यं क्षमा सत्यमहिंसा दम आर्जवम्।**
**प्रीतिः प्रसादो माधुर्यमक्रोधश्च यमा दश॥ "**[208] इति।

**नियमाः** - "शौच-सन्तोष-तपः-स्वाध्यय-ईश्वरप्रणिधानानि नियामाः"[209] योगसूत्रेषु प्रतिपादिताः। **शौचं** बाह्यमाभ्यन्तरमिति द्विविधम्। मृज्जलादिजनितं हितमितपवित्राहारजन्यं बाह्यं शौचम्। चित्तमलानां क्षालनमाभ्यन्तरं शौचम्। **सन्तोषः** प्राप्तात् भोगसाधनात् अधिकं प्राप्तुमनिच्छा। **तपः** शीतोष्णादिद्वन्द्वसहनम्। अयमेव शमादिषु तितिक्षा उच्यते। गीतायां शारीर-वाचिक-मानसभेदेन तपः वर्ण्यते। तत्र शारीरं तपः उक्तं -

**"देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं।**
**ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते॥ "**[210] इति।

वाचिकं तपश्च उपदिष्टम् -

**"अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥ "**[211] इति

---

202. भ.गी.16/1,2,3
203. यो.सू.2/30
204. यो.सू.2/31
205. सर्ववेदान्त.911,912
206. हठ.प्र 1/16.1
207. दत्त.योग.32
208. आनन्दगिरि (गी.भा.) - 5/1
209. यो.सू.2/32
210. भ.गी.17/14
211. भ.गी.17/15

मानसं तपश्च उक्तं –

**“मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।**

**भावसंशुद्धिरित्येत्तपो मानसमुच्यते॥ ”**[212] इति।

एवमेव सत्त्वरजस्तमिगुणभेदेनापि गीतायां तपः वर्णितः। तत्र सात्त्विकं तपस्तावत् वर्णितम् –

**“श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः।**

**अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते॥ ”**[213] इति।

राजसं च प्रतिपादितम् –

**“सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।**

**क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्॥ ”**[214] इति ।

तामसं च तपः उक्तं –

**“मूढग्राहेणात्मनो यत्पीडया क्रियते तपः।**

**परस्योत्सादनार्थं वा तत्तामसमुदाहतम्॥ ”**[215] इति।

**स्वाध्यायो** मोक्षशास्त्राणामध्ययनं प्रणवजपो वा। उपनिषत्सु गीतायां च स्वाध्यायविधानं श्रूयते। तद्यथा – “आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेण अभिसमावृत्त्य कुटुम्बे शुचौ देशे स्वाध्यामधीयानः”[216], “ऋतं च स्वाध्यायप्रवचने च”[217], “स्वाध्यायान्मा प्रमदः”[218], “स्वाध्यायज्ञानयज्ञाश्च यतयः संश्रितव्रताः”[219] इत्यादिरूपेण। वेदान्ते अपि स्वाध्यायस्य ऋग्वेदाद्यध्ययनं[220] मन्त्रो जपो[221] अर्थः क्रियते। **ईश्वरप्रणिधानं** परमगुरौ सर्वकर्मार्पणम्। गीतायामपि – “सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज”[222] इति भगवद्वचनम्। वदन्ति च आचार्याः – “ईश्वरार्पणबुद्ध्या अनुष्ठीयमानः सत्त्वशुद्धये भवति फलाभिसन्धिवर्जितः। शुद्धसत्त्वस्य च ज्ञाननिष्ठायोग्यताप्राप्तिद्वारेण ज्ञानोत्पत्तिहेतुत्वेन च निःश्रेयसंहेतुत्वमपि प्रतिपद्यते”[223] इति। अथवा ब्रह्मविषयिणी प्रत्ययेन अन्यप्रत्ययतिरस्कारः नियम इति तस्य सामान्यलक्षणम्। उक्तञ्च –

**“सजातीयप्रवाहश्च विजातीयतिरस्कृतिः॥**

**नियमो हि परानन्दो नियमात्क्रियते बुधैः।”**[224] इति।

हठयोगे तु दश नियमाः उच्यन्ते। तथा च उक्तं –

**“तपः सन्तोष आस्तिक्यं दानमीश्वरपूजनम्।**

**सिद्धान्तवाक्यश्रवणं ह्रीमती च तपो हुतम्।**

**नियमा दश सम्प्रोक्ता योगशास्त्रविशारदैः॥ ”**[225] इति।

---

212. भ.गी.17/16
213. भ.गी.17/17
214. भ.गी.17/18
215. भ.गी.17/19
216. छां.उ.8/15/1
217. तै.उ.शीक्षा.9/1
218. तै.उ.शीक्षा.11/1
219. भ.गी.4/28
220. गी.भा.16/1
221. न्यायनिर्णयः (सू.भा.) – 2/2/41
222. भ.गी.18/66
223. गी.भा.1/1
224. सर्ववेदान्त.912,913

एषु अहिंसा एव मुख्या नान्ये इति हठयोगशास्त्रविद:। तदुक्तं – "अहिंसा नियमेष्वेका मुख्या भवति नापरे"[226] इति। गीताभाष्यस्य आनन्दगिरिव्याखाने अपि दश नियमा: व्याख्याता:। तदुक्तं –

**"दानमिज्या तपो ध्यानं स्वाध्यायोपस्थनिग्रहौ।**

**व्रतोपवासौ मौनं च स्नानं च नियमा दश।।** "[227] इति।

**आसनम् –** "स्थिरं सुखम्–आसनम्"[228]। योगाङ्गभूतम् आसनस्य सिद्ध्यर्थम् उपायद्वयं योगसूत्रेषु विहितं "प्रयत्नशैथिल्यादनन्तसमापत्तिभ्याम्"[229] इति। शरीरस्य स्वाभाविकचेष्टात: विरति: प्रयत्नशैथिल्यमुच्यते। तेन च शरीरस्य स्थिरता सिद्ध्यति। अनन्ते शेषनागे चित्तस्य एकाग्रता अपि स्थिरं सुखमासनं साधयति। गीतायामपि – "स्थिरमासनमात्मन:"[230], "समं कायशिरोग्रीवं धारयन् अचलं स्थिर:"[231] इति स्थिरं सुखमेव आसनं विहितम्। यस्मिन् देहस्थितौ सति सुखेन ब्रह्मचिन्तनं कर्तुं शक्यं तदासनमुच्यते। उक्तञ्च –

**"सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिन्तनम्।।**

**आसनं तद्विजानीयादितरत्सुखनाशनम्।** "[232] इति। व्यासभाष्ये पद्मासनं, वीरासनं, भद्रासनं, स्वस्तिकासनं, दण्डासनं, पर्यङ्कासनं, क्रौञ्चनिषदनासनं, हस्तिनिषदनासनम्, उष्ट्रनिषदनासनं, समसंस्थानासनं, स्थिरसुखासनं, बद्धासनं, यथासुखासनञ्च निर्दिष्टम्[233]। पञ्चमे अध्याये अन्यानि अपि आसनानि निरूपितानि।

**प्राणायाम:** – श्वासप्रश्वासयो: गतिविच्छेद: प्राणायाम:[234]। योगसूत्रेषु एव "प्रच्छर्दनविधारणाभ्यां वा प्राणस्य"[235] इति चित्तस्थित्यर्थं प्राणायाम: उपायत्वेन प्रदर्शित:। स च बाह्याभ्यन्तस्तम्बभेदेन त्रिविध:। तत्र प्राणस्य प्रश्वासपूर्वकं गत्यभाव: बाह्य:, श्वासपूर्वकं गत्यभाव: आभ्यन्तर:। यत्र उभयोरभाव: स: स्तम्भवृत्ति:। उक्तञ्च – "बाह्याभ्यन्तर–स्थम्भवृत्ति: देशकालसङ्ख्याभि: परिदृष्टो दीर्घसूक्ष्म:" इति। वेदान्तसारे अपि – "रेचकपूरककुम्भकलक्षणा: प्राणनिग्रहोपाया: प्राणायामा:"[236] इति प्रतिपादितम्। अथवा सर्वं ब्रह्म एव इति भावनापूर्वकं सर्वेषां ब्रह्मभिन्नानां वृत्तीनां निरोध: प्राणायाम: उच्यते। तत्र प्रपञ्चयस्य मिथ्यात्वनिश्चयेन तत्तिरस्कार: रेचक: इति, ब्रह्मेव सत्यमहमस्मीति भावना पूरक:, तस्मिन्नेव ब्रह्मभावे स्थिति: कुम्भको भवति। उक्तञ्च –

**"चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात् ।।**

**निरोध: सर्ववृत्तीनांप्राणायाम:स उच्यते।**

**निषेधनं प्रपञ्चस्य रेचकाख्य: समीरण:।।**

**ब्रह्मैवास्मीति या वृत्ति: पूरको वायुरीरित:।**

**ततस्तद्वृत्तिनैश्चल्यं कुम्भक: प्राणसंयम:।।** "[237] इति।

प्राणायमस्य विषये विस्तार: पञ्चमे अध्याये एव कृत:।

---

225. हठ.प्र.1/16.2
226. दत्त.योग.33
227. आनन्दगरि (गी.भा.) 5/1
228. यो.सू.2/46
229. यो.सू.2/47
230. भ.गी.6/11
231. भ.गी.6/13
232. सर्ववेदान्त.913, 914
233. व्यासभाष्यम् (यो.सू.) 2/46
234. "तस्मिन् सति श्वासप्रश्वासयो: गतिविच्छेद: प्राणायाम:" – यो.सू.2/49
235. यो.सू.1/34
236. वेदान्तसार: 204
237. सर्ववेदान्त. 914–916

**प्रत्याहारः** - इन्द्रियाणां स्वविषयैः सह सम्बन्धाभावात् चित्तकारेण एव परिणामः प्रत्याहारः उच्यते योगिभिः। तदुक्तं – "स्वविषयसम्प्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः"[238] इति। "इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः" इति वेदान्तसारः[239]। न केवलम् इन्द्रियेभ्यः प्रत्याहरणमात्रं किन्तु अन्तःकरणस्य ब्रह्मणि तादात्म्यं प्रत्याहारः। अतः योगोक्तचित्ताकारमात्र–परिणामात् विशेषः वेदान्तदर्शने प्रतिपाद्यते। उक्तञ्च–

**"विषयेष्वात्मतां त्यक्त्वा मनसश्चितिमज्जनम्॥**

**प्रत्याहारःस विज्ञेयोऽभ्यसनीयो मुमुक्षुभिः।"**[240] इति।

**धारणा** – नाभिचक्रे हृदयपुण्डरीके मूर्ध्नि ज्योतिषि नासिकाग्रे जिह्वाग्रे इत्येवमादिषु देशेषु बाह्ये वा विषये चित्तस्य वृत्तिमात्रेण बन्धः धारणा इति योगशास्त्रविदः। तदुक्तं – "देशबन्धश्चित्तस्य धारणा"[241] इति। किन्तु अद्वैतमते अद्वितीये ब्रह्मणि एव चित्तस्य स्थितिः धारणा उच्यते। उक्तञ्च –

**"अद्वितीयवस्तुनि अन्तरिन्द्रियधारणं धारणा"**[242],

**"यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात्॥**

**मनसो धारणं चैव धारणा सा परा मता।"**[243] इति।

**ध्यानम्** – यत्र चित्तधारणा सम्पादिता तत्र ध्येयावलम्बनस्य प्रत्ययस्य प्रत्ययान्तरेण अपरामृष्टः सदृशप्रवाहः ध्यानमुक्तम्। तथा च सूत्रं – "तत्र प्रत्ययैकतानता ध्यानम्"[244] इति। आचार्याश्च "तैलधारावत् सन्ततः अविच्छिन्नप्रत्ययोध्यानम्; तेन ध्यानेन आत्मनि बुद्धौ पश्यन्ति आत्मानं प्रत्यक्चेतनम् आत्मना स्वेनैव प्रत्यक्चेतनेन ध्यानसंस्कृतेन अन्तःकरणेन केचित् योगशास्त्रविदः"[245] इति योगोक्तरीत्या ध्यानलक्षणं प्रयोजनं च प्रतिपादयन्ति। ध्याने ध्येयं ध्याता ध्यानमिति त्रिपुटीनामनुभवः भवति। प्रत्ययप्रवाहस्य आलम्बनं तु ध्येयं भवति। अयमेव समाधानमिति प्राक् शमादिषु प्रतिपादितम्। वेदान्तदर्शने तु ध्यानकाले ध्येयं वस्तु ब्रह्मैव भवेत् नान्यत् इति प्रतिपाद्यते। तदेव उक्तं –

**"ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिः॥**

**ध्यानशब्देन विख्याता परमानन्ददायिनी।"**[246] इति।

**समाधिः** - यदा प्रत्ययः ध्येयाकारमात्रं शिष्यते स समाधिः चरमाङ्गः। उक्तञ्च– "तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः"[247] इति। वेदान्ते अपि

**"निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः।**

**वृत्तिविस्मरणं सम्यक्समाधिर्ध्यानसंज्ञिकः॥** "[248] इति

समाधिः प्रतिपादितः।

अत्र ध्येयाकारमात्रमित्यनेन ध्यातृध्यानादिविकल्पानां लयः न उच्यते, किन्तु अभिभवमात्रमभिप्रेतम्। अत एव योगसूत्रे अपि "स्वरूपशून्यमिव" इति इवशब्दः व्यपदिष्टः। अतः अत्र समाधिरिति सबीजः सम्प्रज्ञातः सविकल्पकः समाधिरेव उच्यते। उक्तञ्च – "तदपि बहिरङ्गं निर्बीजस्य"[249] इति। वेदान्तसारे अपि "समाधिस्तूक्तः सविकल्पकः"[250] इति प्रतिपादितम्।

---

238. यो.सू.2/54
239. वेदान्तसारः 205
240. सर्ववेदान्त.197
241. यो.सू. 3/1
242. वेदान्तसारः 206
243. सर्ववेदान्त.198,199
244. यो.सू.3/2
245. गी.भा.13/24
246. सर्ववेदान्त.919.920
247. यो.सू.3/3
248. सर्ववेदान्त.920,921
249. यो.सू.3/8
250. वेदान्तसारः 208

समाधेः विषये ईषत् विस्तारः क्रियते। समाधिः द्विविधः सविकल्पक-निर्विकल्पकभेदात्[251]। योगशास्त्रविदः अपि सबीज-निर्बिजभेदेन द्विविधं समाधिं वदन्ति। दर्शितं च योगसूत्रे – "ता एव सबीजः समाधिः"[252], "तस्यापि निरोधे सर्वनिरोधात् निर्बीजः समाधिः"[253] इति। योगशास्त्रे सबीजनिर्बिजसमाधी सम्प्रज्ञात-असम्प्रज्ञातसमाधी इत्यपि व्यपदिश्येते। निर्विकल्पकः निर्बीजसमाधिः जीवन्मुक्तिरेव, तदग्रे निरूप्यते।

यत्र समाधौ ज्ञातृ-ज्ञानादीनां विकल्पानां लयम् अनपेक्ष्य एव अद्वितीये ब्रह्मणि तदाकारितायाः चित्तवृत्तेः अवस्थानं सविकल्पकसमाधिरुच्यते। तदुक्तं वेदान्तसारे – "तत्र सविकल्पको नाम ज्ञातृ-ज्ञानादि-विकल्पलयानपेक्षया अद्वितीयवस्तुनि तदाकार-आकारितायाः चित्तवृत्तेः अवस्थानम्"[254] इति। योगाङ्गेषु चरमः समाधिः सविकल्पकः एव प्रागेव निरूपितम्।

योगिनस्तु अस्य सबीजस्य सम्प्रज्ञातसमाधेः पुनरपि अवान्तरभेदान् प्रतिपादयन्ति। योगशास्त्रविदः षड्विंशति तत्त्वानि वदन्ति इति प्रागेव दृष्टम्। तानि तत्त्वानि ग्राह्य-ग्रहण-ग्रहीतृभेदेन विभज्यन्ते। तत्र स्थूलानि भौतिकानि वस्तूनि, सूक्ष्माणि तन्मात्राणि च ग्राह्यानि उच्यन्ते। अतः ग्राह्येषु अपि स्थूल-सूक्ष्मभेदेन द्वैविध्यम्। एकादशेन्द्रियेभ्यः विषयग्रहणं भवति इति तानि ग्रहणपदेनाभिधीयन्ते। अहङ्कारः, महतत्त्वाभिधा बुद्धिः, प्रकृतिः, पुरुषः इत्येते विषयग्रहणात् ग्रहीतृशब्देन व्यपदिश्यन्ते। यथा स्वच्छः स्फटिकः रक्त-पीत-नीलादिवर्णविशिष्ट-जपाकुसुमाद्युपाधि-सन्निधानभेदात् तदुपाध्याकारेण निर्भासते, एवमेव वैराग्यस्य मैत्र्यादीनां च अभ्यासात् रजस्तमोवृत्तिरहितं विशुद्धं योगशास्त्रविदः चित्तं ग्राह्यविषयोपरक्तं ग्राह्याकारेण, ग्रहणविषयोपरक्तं तदाकारेण, ग्रहीतृविषयोपरक्तं तदाकारेण च निर्भासते, स च सम्प्रज्ञातसमाधिः सविकल्पकसमाधिः सबीजसमाधिरिति वा अभिधीयते। तदुक्तं – "क्षीणवृत्तेः अभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः"[255] इति। तत्र स्थूलपञ्चमहाभूतरूपग्राह्यविषयिणी पाञ्चभौतिक-चतुर्भुजादि-भगवत्प्रतिमा-रूपग्राह्यविषयणी वा चित्तस्य भावना वितर्कसम्प्रज्ञातसमाधिरुच्यते। सूक्ष्मतन्मात्ररूपग्राह्यविषयिणी चित्तस्य भावना विचार-सम्प्रज्ञातसमाधिरुच्यते। एकादशेन्द्रियरूप-ग्रहणविषयिणी चित्तस्य भावना आनन्द-सम्प्रज्ञातसमाधिरभिधीयते। अहङ्कार-बुद्धि-प्रकृति-पुरुषरूप-गृहीतृविषयिणी चित्तस्य भावना अस्मिता-सम्प्रज्ञातसमाधिरिति अभिधीयते। तदुक्तं – "वितर्क-विचार-आनन्द-अस्मितानुरूपानुगमात् सम्प्रज्ञातः"[256] इति। तेषु वितर्क-समाधिः विचार-आनन्द-अस्मितानुगतः, द्वितीयः वितर्कविकलः आनान्दास्मितानुगतः, तृतीयस्तु वितर्क-विचारविकलः अस्मितानुगतः, चतुर्थस्तु अस्मितामात्रः सम्प्रज्ञातसमाधिः भवति इति अवगन्तव्यम्। वितर्कसम्प्रज्ञातसमाधौ अपि सवितर्क-निर्वितर्कभेदेन द्वैविध्यम्। यत्र स्थूल-ग्राह्यविषयिणी चित्तस्य भावना शब्दार्थज्ञानविकल्पैः सङ्कीर्णा स सवितर्कः। यथा गौरिति शब्दप्रयोगे सति कण्ठताल्वादिसंयोगजनितः श्रोत्रेन्द्रियग्राह्यः "गौः" इत्याकारकः शब्दः, शृङ्गसास्नादिमती व्यक्तिः, तद्व्यक्त्याकार-चित्तपरिणाम-जनितं ज्ञानमिति त्रयं गृहीतं भवति। यद्यपि गोशब्दः, गो-व्यक्तिः, गो-ज्ञानम् इति त्रयमपि परस्परं भिन्नं तथापि अविभागेन एषां ग्रहणं भवति। यदि एवं स्थूलग्राह्यविषयक-वितर्क-सम्प्रज्ञातसमाधौ शब्द-अर्थ-ज्ञानानां विकल्पानां सङ्कीर्णतया भानं भवति, स सवितर्कः उच्यते। तदुक्तं – "तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा सवितर्का समापत्तिः" इति। यत्र स्थूलग्राह्यविषयसम्प्रज्ञातसमाधौ शब्द-ज्ञानयोः अभावेन अर्थमात्रस्य भासः भवति, स निर्वितर्कः उच्यते। एवमेव सूक्ष्म-ग्राह्यविषयक-विचारसमाधौ अपि शब्द-अर्थ-ज्ञानानां सङ्कीर्णतया सविचारसमापत्ति, अर्थमात्रभासकतया निर्विचारसमापत्तिः इति भेदद्वयम्। ग्रहणविषयक-आनन्दसमापत्तौ ग्रहीतृविषयक-अस्मितासमापत्तौ अपि शब्दार्थज्ञानानां सङ्कीर्णता-असङ्कीर्णतया सविकल्प-निर्विकल्पकभेदाः। इत्थं ग्राह्यसमापत्तौ सवितर्कः निर्वितर्कः सविचारः निर्विचारः इति चत्वारः भेदाः, ग्रहणसमापत्तौ ग्रहीतृसमापत्तौ च सविकल्पक-निर्विकल्पकभेदेन द्वौ द्वौ भेदौ, इति सम्प्रज्ञातसमाधेः अष्टौ भेदाः[257]।

ग्राह्यविषयकसमापत्तिषु चतुर्षु निर्विचारसमापत्तिः श्रेष्ठा। अतः "निर्विचारवैशारद्ये अध्यात्मप्रसादः"[258] भवतीत्युक्तम्। तत्र वैशारद्यं नाम अशुद्ध्योः रजस्तमसोः निवारणेन स्वच्छस्य सत्त्वगुणमात्रस्य स्थिररूपेण प्रवाहः। तेन वैशारद्येन योगशास्त्रविदः भूतेभ्यः आरभ्य प्रकृतिपर्यन्तं सर्वेऽपि सूक्ष्मपदार्थाः क्रमानुरोधं विना प्रत्यक्षाः भवन्ति, स च सर्वपदार्थानां साक्षात्कारः अध्यात्मप्रसादः उच्यते। अत एव सः स्वं सर्वेभ्यः अज्ञानिभ्यः आत्मानं श्रेष्ठं जानाति। तदुक्तं –

**"प्रज्ञाप्रसादमारुह्य अशोच्यः शोचते जनान्।**

---

251. वेदान्तसारः 192
252. यो.सू.1/46
253. यो.सू.1/51
254. वेदान्तसारः 194
255. यो.सू.1/41
256. यो.सू.1/17
257. तत्त्ववैशारदी (यो.सू.) 1/46
258. यो.सू.1/47

© 2018 IJSRSET | Volume 4, Issue 1, January-February-2018
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 1797-1827

**भूमिष्ठानिव शैलस्थः सर्वान्प्रज्ञोनुपश्यति॥** "[259] इति।

इमं च अध्यात्मप्रसादं योगिजनाः "ऋतम्भरा-प्रज्ञा" इत्यपि वदन्ति। तदुक्तं- "ऋतम्भरा तत्र प्रज्ञा"[260] इति। ऋतं सत्यं पदार्थानां यथार्थं स्वरूपं भरति या प्रज्ञा सा ऋतम्भरा। सम्प्रज्ञातसमाधिप्रभवा ऋतम्भराप्रज्ञा व्युत्थानसंस्कारान् नाशयति। तेषां नाशेन तज्जन्याः प्रमाणविपर्ययादि-प्रत्यायाः न प्रादुर्भवन्ति, ततः सम्प्रज्ञातसमाधिः सिध्यति। समाधिना प्रज्ञा, प्रज्ञया तत्संस्काराः, ततश्च प्रज्ञा ततश्च संस्काराः इति प्रज्ञा-संस्कारयोः चक्रः आवर्तते। समाधिजसंस्काराणम् अर्थात् ऋतम्भराप्रज्ञाजन्य-संस्काराणाम् अग्रे प्रतिपादयिष्यमाण-परवैराग्यस्य अभ्यासेण उत्पद्यमान-निरोधसंस्कारैः क्रमेण बाधे सति निर्बीजसमाधिः जीवन्मुक्तिः सिध्यति, यत्र हि जीवः स्वरूपे स्थितो भवति[261]।

एवं यमादारभ्य ध्यानान्तानाम् उपायानामभ्यासेण सम्प्रज्ञातसमाधिः सिद्ध्यति। सम्प्रज्ञातसमाधेः अभ्यासेण असम्प्रज्ञातसमाधिः जीवन्मुक्तिः इति वेदान्त-योगशास्त्रयोः ऐकमत्येन उपदेशः।

**वैराग्यम् –** योगमते वैराग्यमपि प्रधानं मोक्षसाधनम्। वैराग्यं चित्तवृत्तीनां निरोधद्वारा मोक्षसाधकं भवति। चितस्य वृत्तिप्रवाहः कल्याणाय पापाय च वहति। तत्र कैवल्याभिमुखी विवेकविषयिणी कल्याणवहा, संसाराभिमुखी अविवेकविषयिणी पापवहा। वैराग्यम् अविवेकविषयं संसाराभिमुखं चित्तप्रवाहं निरुद्ध्य, चित्तं कैवल्याभिमुखं करोति। उक्तञ्च – "अभ्यासवैराग्याभ्यां तन्निरोधः"[262] इति। वैराग्यं परापरभेदेन द्विविधम्। अपरवैराग्यं पुनरपि यतमानसंज्ञा व्यतिरेकसंज्ञा एकेन्द्रियसंज्ञा वशीकारसंज्ञा इति भेदेन चतुर्विधम्[263]। तत्र रागद्वेषादीनां चित्तमलानां निवृत्तीच्छया मैत्र्यादीनां भावनानाम् अभ्यासारम्भः यतमानसंज्ञावैराग्यम् उच्यते। तदारम्भे सति केचन मलाः निवृत्ताः भवन्ति, अन्ये च केचन अनिवृत्ताः अवशिष्यन्ते। एवं वैराग्याभ्यासेन अग्रे निवृत्तयिष्यमाणेभ्यः मलेभ्यः निवृत्तानां मलानां पृथग्रूपेण निश्चयः व्यतिरेकसंज्ञावैराग्यम्। वैराग्याभ्यासात् प्रायेण निवृत्तानि चित्तमलानि, इन्द्रियाणि विषयाभिमुखेन प्रेरितुमसमर्थानि सन्त्यपि कदाचित् सूक्ष्मरूपेण उत्सुकानि भवन्ति। तदा तेषां मनोरूपे एकेन्द्रिये व्यवस्थापनमेकेन्द्रिय-संज्ञावैराग्यम्। यदा सर्वेषु दिव्य-अदिव्यविषयेषु दोषदर्शनाभ्यासात् दोषदृष्टिः प्रवृद्धा सती औत्सुक्यमात्रमपि निवृत्तं भवति, हेय-उपादेयताभावश्च निवृत्तः भवति तत् वशीकारसंज्ञावैराग्यम्। तदुक्तं – "दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञावैराग्यम्"[264] इति। यतमानादित्रयाणां वशीकारसंज्ञायामेव चरितार्थत्वात् योगसूत्रेषु वशीकारसंज्ञावैराग्यमात्रं निर्दिष्टम्। इदं च अपरवैराग्यं सम्प्रज्ञातसमाधिं सम्पादयति, परवैराग्यहेतुश्च भवति। वेदान्तप्रतिपादितेषु साधानाचतुष्टयेषु इहामुत्रार्थभोगविरागः, योगप्रतिपादितम् अपरवैराग्यम् एव इति अत्र स्मरणीयम्। अपरवैराग्येण सम्प्रज्ञातसमाधिलाभे, तस्याप्यभ्यासेन विवेकज्ञानरूप-अपरवैराग्योदित-निरुद्धसंस्कारैः सम्प्रज्ञातसमाधिजन्य-ऋतम्भराप्रज्ञासंस्काराणां विनाशे निर्बीजसमाधिः जीवन्मुक्तिः।

योगशास्त्रविदः प्रकृतिपुरुषयोः विवेकेन सर्वसंसारकारेणेभ्यः त्रिगुणेभ्यः आत्यन्तिकविरागं परवैराग्यं वदन्ति। तदुक्तं – "तत्परं पुरुषख्यातेः गुणवैतृष्ण्यम्"[265] इति। अनेन विवेकज्ञानात्मेकेन परवैराग्येण निर्बीजः असम्प्रज्ञातः समाधिः, कैवल्यमुपजायते। तदुक्तं – "एतस्यैव हि नान्तरीयकं कैवल्यम्"[266] इति। वेदान्तिनः अपि अखण्डाकारवृत्यात्मकस्य ज्ञानस्य मोक्षं प्रति असाधारणकारणत्वं प्रतिपादयन्ति इति प्रागेव निरूपितम्। तदेव अखण्डाकारं ज्ञानं विवेकख्यातिः योगिभिः परवैराग्यमुच्यते इत्यवगन्तव्यम्।

**अभ्यासः –** चित्तवृत्तिनिरोधपूर्वकं समाधिसिद्धये अभ्यासः अत्यवश्यः उपायः। चित्तस्य रजस्तमो-प्रभववृत्त्यभावेन प्रशान्ततया हर्षशोकादिराहित्येन निर्मल-एकाग्रवृत्तिप्रवासिद्धये उत्साहः, तत्साधनाय यमादीनाम् उपायाणमनुष्ठाने दृढतापूर्वकं प्रयत्नः अभ्यासः उच्यते। तदुक्तं – "तत्र स्थितो यत्नोऽभ्यासः"[267] इति। वेदान्ते योगे आयुर्वेदे अन्यत्र वा मोक्षसिद्धये उपदिष्टाः मार्गाः अभ्यासमन्तरा न सफलाः भवन्ति। मोक्षोपायानामनुष्ठाने उत्साहः दृढतापूर्वकं प्रयत्नश्च सर्वशास्त्रसाधारणः मुमुक्षुमात्रेण करणीयः। चित्तस्य अनादिकालादपि विषयभोगवासनाजन्य-व्युत्थानसंस्कारबलात्

---

259. योगसूत्र-व्यासभाष्यधृतं शान्तिपर्वणः (17/20) वचनम् – व्यासभाष्यम् (यो.सू.) 1/47
260. यो.सू.1/48
261. तदा द्रष्टुः स्वरूपे अवस्थानम् – यो.सू.1/3
262. यो.सू.1/12
263. तत्त्ववैशारदी (यो.सू.) 1/15
264. यो.सू.1/15
265. यो.सू.1/16
266. व्यासभाष्यम् (यो.सू.) 1/16
267. यो.सू.1/13

चाञ्चल्यमेव अभ्यस्तमतः चाञ्चल्यं चित्तस्य स्वभाव इव सञ्जातं भवति। आगन्तुकेन स्वल्पकालसाध्येन केनापि उपायेन चित्तस्य स्थिरता सम्पादयितुमसाध्या। यदि योगी स्थैर्यं चित्तस्य स्वाभाविकधर्मत्वेन सम्पादयितुमिच्छति तर्हि अभ्यासः एव तत्र उपायो भवति। उक्तञ्च गीतायम् –

**"असंशयं महाबाहो मनो दुर्निग्रहं चलम्।**

**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।।** "[268] इति।

गौडपादैरपि टिट्टिभदृष्टान्तेन मनोनिग्रहाय अभ्यासः विहितः। समुद्रः एकस्य टिट्टिभस्य अण्डानि निगलति। तदा कुपितः टिट्टिभः सकलं समुद्रं शोषयामि इति प्रतिजानीते। कुशाग्रसमानेन स्वचञ्चुना समुद्रात् बिन्दुशः जलं निष्कासयितुमारेभे। अन्यैः पक्षिभिः समुद्रशोषणे सन्देहे प्रदर्शिते "अद्य न हि तु कतिपय वर्षेषु, यदि नास्मिन् जन्मनि तर्हि कोटिजन्मसु वा समुद्रमिमं शोषयामि" इति भणति। नारदः वृत्तान्तमिमं वैकुण्ठनिवासिनं पक्षिराजं गुरुडं प्रति निवेदयति। टिट्टिभस्य साहाय्यार्थमागतः गरुडः स्वपङ्कैः समुद्रं प्रताडयति। भीतः समुद्रः टिट्टिभस्य अण्डानि प्रत्यर्पयति। एवं प्रयत्नेन असाध्यमपि साधयितुं शक्यम्। एवमेव स्वाभावेण एव चञ्चलस्य चित्तस्य स्थिरतासम्पादनाय खेदराहित्येन प्रयत्नः विधेयः। तदुक्तं –

**"उत्सेक उदधेर्यद्वत् कुशाग्रेणैकबिन्दुना।**

**मनसो निग्रहस्तद्वत् भवेदपरिखेदतः।।** "[269] इति।

यदि अभ्यासः दृढो भवेत् तर्हि उपायत्रयं योगसूत्रे निरूपितम्। उक्तञ्च – "स तु दीर्घकाल-नैरन्तर्य-सत्कारासेवितो दृढभूमिः"[270] इति।

अभ्यासः दीर्घकालपर्यन्तं सातत्येन न विहितः चित्तस्थैर्यसाधकं स्यात्। तपसा ब्रह्मचर्येण विद्यया श्रद्धाया च सम्पादितः सत्कारसेवितः उच्यते[271]। सत्कारासेवितो अभ्यासः व्युत्थानसंस्कारान् अभिभूय चित्तस्थैर्यं साधयति। एवं दीर्घकाल-नैरन्तर्य-सत्कारसेवितः प्रबलः अभ्यासः यत्नः चित्तनिग्रहद्वारा मोक्षसाधकः भवति इति योगवेदान्तशस्त्रयोः अभ्युपेयते।

**ईश्वरप्रणिधानम् –** आशुसमाधिलाभाय योगशास्त्रविदः ईश्वरप्रणिधानमुपायत्वेन वदन्ति। उक्तञ्च – "ईश्वरप्रणिधानाद्वा" [272] इति। "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः"[273] इति प्रथमे अध्याये ईश्वरः वर्णितः। तादृशे ईश्वरे भक्तिविशेषः प्रणिधानम्। सर्वस्य कर्मणः ईश्वरार्पणबुध्या अनुष्ठानम्, ईश्वरे मनसः एकतानता, भगवन्नामोच्चारणं भवगवच्चिन्तनादिकं भक्तिरित्यवगन्तवयम्। तदा ईश्वरः आशुसमाधिलाभाय अनुगृह्णाति। उक्तञ्च – "तदभिध्यानमात्रादपि योगशास्त्रविदः आसन्नतरः समाधिलाभः समाधिफलं च भवति"[274] इति। एवमेव वेदान्तिभिरपि ईश्वरप्रणिधानं प्रतिपाद्यते। तदुक्तं भाष्यरत्नप्रभायाम् – "भक्तिध्यानाभ्यां प्रत्यगात्मनः चित्ते प्रकर्षेण निधानं स्थापनं प्रणिधानम्"[275] इति। सूत्रभाष्ये अपि ईश्वरप्रणिधानं भगवतः यज्ञ-स्वाध्याय-चिन्तनाधिभिः आराधानं मोक्षसाधकमिति प्रतिपाद्यते। तदुक्तं – "परमेश्वरं भगवन्तम् अभिगमनोपादान-इज्या-स्वाध्याय-योगैः वर्षशतमिष्ट्वा क्षीणक्लेशः भगवन्तमेव प्रतिपद्यते।... तस्य भगवतो अभिमगमनादि-लक्षणम् आराधनम् अजस्रम् अनन्यचित्तत्या अभिप्रेयते,...श्रुतिस्मृत्योः ईश्वरप्रणिधानस्य प्रसिद्धत्वात्"[276] इति। "अपि च संराधने प्रत्यक्षानुमानाभ्याम्"[277] इति सूत्रभाष्ये अपि आचार्याः भक्ति-ध्यान-प्रणिधानाद्यनुष्ठानेन निर्गुणं परमात्मानमनुभवति इति वदन्ति। तदुक्तं – "अपि च एनमात्मानं निरस्तसमस्तप्रपञ्चमव्यक्तं संराधनकाले पश्यन्ति योगशास्त्रविदः; संराधनं च भक्तिध्यानप्रणिधानाद्यनुष्ठानम्"[278] इति।

गीतायामपि भगवान् "सर्वं कर्म मदर्पणं" कुरु इति आदिशति। उक्तञ्च –

**"यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।**

---

268. भ.गी.6/35

269. मां.का.अद्वैत.41

270. यो.सू.1/14

271. व्यासभाष्यम् (यो.सू.) 1/14

272. यो.सू.1/23

273. यो.सू.1/24

274. व्यासभाष्यम् (यो.सू.) 1/23

275. भाष्यरत्नप्रभा (सू.भा.) 3/2/24

276. सू.भा.2/2/42

277. ब्र.सू.3/2/24

278. सू.भा.3/2/24

**यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्।।** "[279] इति।

ईश्वरप्रणिधानेन ईश्वरानुग्रहपूर्वकं मुक्तिरिति स्वयं भगवानुपदिशति। तदुक्तं –

**"अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।**

**तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।** "[280] इति।

योगशास्त्रविदः प्रणवः ईश्वरवाचकः इति वदन्ति। उक्तञ्च – "तस्य वाचकः प्रणवः"[281] इति। अतः प्रणवं जपतः प्रणवाभिधेयम् ईश्वरं भावयतः योगशास्त्रविदः चित्तमेकाग्रं भवति। उक्तञ्च – "तज्जपस्तदर्थभावनम्"[282] इति। एकाग्रचित्तवान् योगी समाधिलाभं प्राप्य, तत्पश्चात् विवेकख्यात्या मुक्तो भवति। उक्तञ्च – ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च" [283] इति। गीतायामपि प्रणवजप–ईश्वरभावनयोः मुक्तिसाधनत्वं प्रतिपाद्यते भगवता। उक्तञ्च –

**"ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।**

**यः प्रयाति त्यजन्देहं स याति परमां गतिम्।।** "[284] इति।

एवम् ईश्वरप्रणिधानं सम्प्रज्ञातसमाधिसाधनद्वारा मुक्तिसाधकं भवति इत्यवगन्तव्यम्।

**योगिभिः प्रतिपादिताः अन्ये मोक्षोपायाः –** सर्वासां चित्तवृत्तीनां ससंस्काराणां निरोधाय, चित्तक्लेशकराः रागद्वेषादयः वृत्तयः आदौ निवारणीयाः। तेषां निवृत्त्या प्रशान्तं मनः कैवल्यं सम्पादयति। चित्तक्लेशानां निग्रहपूर्वकं चित्तस्थितये बहवः उपायाः योगदर्शने निरूपिताः।

सुखसम्भोगापन्नेषु सर्वप्राणिषु मैत्री, दुःखितेषु करुणा, पुण्यात्मकेषु मुदिता, अपुण्यशीलेषु उपेक्षा इत्येषां भावनानामभ्यासेन[285] प्रसन्नं चित्तं स्थिरं भवति। तदुक्तं – "ततश्च चित्तं प्रसीदति। प्रसन्नमेकाग्रं स्थितिपदं लभते" [286] इति। प्राणायामेनापि चित्तसमाधानं साध्यमुच्यते "प्रच्छर्दनविदारणाभ्यां वा प्राणस्य"[287] इति।

**आलम्बनविशेषान् स्वीकृत्य चित्तैकाग्र्याय अभ्यासः योगशास्त्रे विधीयते।** यथा "तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः"[288] इति एकस्मिन्नेव तत्वे चित्तस्य स्थिरीकरणाभ्यासः उपदिष्टः। अत्र एकतत्त्वमिति ईश्वरः उच्यते। ईश्वरे मनसः पौनःपुन्येन स्थित्याभ्यासः चित्तसमाधानं साधयति। नासिकाग्रे जिह्वाग्रे तालुनि जिह्वामध्ये जिह्वामूले चन्द्रादित्यादिषु वा प्रतीकेषु मनसः स्थिरीकरणं समाधिप्रज्ञामुत्पादयति इति उच्यते। तदुक्तं – "विषयवती प्रवृत्तिरुपत्ना: मनसः स्थितिनिबन्धिनी"[289] इति। एवमेव सनक–दत्तात्रेय–कृष्णद्वैपायन–शुकदेवादीनां महर्षिणां चित्तमपि आलम्बयन् योगशास्त्रविदः चित्तं स्थितिपदं लभते। तदुक्तं – "वीतरागविषयं वा चित्तम्"[290] इति। स्वप्नावस्थायां भगवत्प्रतिमादिकं, सुषुप्तौ सुखस्वरूपं स्वात्मानं वा आलम्बनत्वेन स्वीकृतं योगशास्त्रविदः चित्तं स्थिरं सत् समाधिलाभं करोति। उक्तञ्च – "स्वप्ननिद्राज्ञानालम्बनं वा"[291] इति। यत्किञ्चित् अभिमतमपि ध्यायन् मनः चित्तसमाधिं साधयति इति वदन्ति योगशास्त्रविदः। उक्तञ्च – "यथाभिमतध्यानाद्वा"[292] इति। एतैः उपायैः चित्तस्थितये

---

279. भ.गी.9/27
280. भ.गी.9/22
281. यो.सू.1/27
282. यो.सू.1/28
283. यो.सू.1/29
284. भ.गी.8/13
285. मैत्रीकरुणमुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातः चित्तप्रसादनम् – यो.सू.1/33
286. व्यासभाष्यम् (यो.सू.) 1/33
287. यो.सू.1/34
288. यो.सू.1/32
289. यो.सू.1/35
290. यो.सू.1/37
291. यो.सू.1/38
292. यो.सू.1/39

अभ्यसन् योगी सूक्ष्मे स्थूले वा यत्किञ्चित् वस्तुनि चित्तं स्थिरीकर्तुं समर्थः भवति। स एव चित्तस्य परमः वशीकारः उच्यते[293]। **एवमेते उपायाः चित्तस्थिरतां सम्पादयन्तः सम्प्रज्ञातसमाधिद्वारा मुक्तये भवन्ति।**

किञ्च "श्रद्धावीर्यस्मृतिसमाधिपूर्वकम् इतरेषाम्"[294] इति सूत्रादपि सम्प्रज्ञातसमाधिः मुक्तिकारणमिति प्रतिपाद्यते योगिभिः। तत्र श्रद्धा चेतसः सम्प्रसादः। श्रद्धया वीर्यं जायते। वीर्यं नाम योगविषयकः उत्साहः प्रयत्नः। प्रयत्नेन स्मृतिरुपतिष्ठते। स्मृतिर्नाम चित्तस्य एकतानतारूपं ध्यानम्। ध्यानप्रभवा सम्पज्ञातसामाधिः। तस्य च सम्प्रज्ञातसमाधिमतः विवेकख्यातिरुदेति, ततः मुक्तिः।

एतेषाम् उपायानाम् अनुष्ठानापेक्षया अनेके भेदाः योगिभिः उपदिश्यन्ते। श्रद्धादयः उपायाः मन्दरूपेण अनुष्ठीयमानाः मृदूपायः इति, सामान्यरूपेण अनुष्ठीयमानः मध्यमोपायः, तीव्ररूपेणानुष्ठीयमानाः अधिमात्रोपायाः उच्यन्ते। तत्र मृदूपायस्यापि पुनः मृदुसंवेग-मध्यमसंवेग-तीव्रसंवेगभेदेन त्रैविध्यम्। एवमेव मध्यमोपायस्य अधिमात्रोपास्य प्रत्येकं त्रयः भेदाः। एवम् आहत्य श्रद्धादीनां मुक्त्युपायानां, तदनुष्ठातॄणां योगिनां च नवभेदाः भवन्ति। ते च नव प्रकाराः योगशास्त्रविदः एवं भवन्ति - 1.मृदूपाय-मृदुसंयोगः, 2.मृदूपाय-मध्यमसंवेगः, ३.मृदूपाय-तीव्रसंवेगः, 4.मध्यमोपाय-मृदुसंयोगः, 5मध्यमोपाय-मध्यसंवेगः, 6.मध्यमोपाय-तीव्रसंयोगः, 7.अधिमात्रोपाय-मृदुसंवेगः, 8.अधिमात्रोपाय-मध्यसंवेग, 9अधिमात्रोपाय-तीव्रसंवेगः। उक्तञ्च - "ते खलु नव योगशास्त्रविदः मृदु-मध्यम-अधिमात्रोपायाः भवन्ति"[295] इति। अधिमात्रतीव्रसंवेगिनः योगशास्त्रविदः समाधिलाभः आशु भवति। तदुक्तं - "तीव्रसंवेगानामासन्नः"[296] इति। अर्थात् सर्वेषां मोक्षोपायानां तीव्राभ्यासेन समाधिलाभः शीघ्रं भवति।

**आयुर्वेदे प्रतिपादिताः मोक्षोपायाः**- आयुर्वेदे अपि चित्तसमाधिः मोक्षोपायः व्यपदिष्टः। तदुक्तं - "मोक्षे निवृत्तिः निःशेषा योगो मोक्षप्रवर्तकः"[297] इति । आत्मेन्द्रियमनोऽर्थानां संयोगात् सुखदुःखमोहात्मकः संसारः प्रवर्तते। अतः तन्निवृत्तये इन्द्रियार्थयोः संयोगः न भवेत्। तस्मात् इन्द्रियार्थानां संयोगकारणं मनः आत्मनि स्थिरीकुर्यात्। एवम् आत्मनि मनसः स्थिरीकरणं समाधिः योगः उच्यते। उक्तञ्च -

**"आत्मेन्द्रियमनोऽर्थानां संन्निकर्षात् पर्वर्तते।**

**सुखदुःखमनारम्भादात्मस्थे मनसि स्थिरे॥**

**निवर्तते** तदुभयं वशित्वं चोपजायते।

**सशरीरस्य योगज्ञास्तं योगमृषयो विदुः॥**"[298] इति।

अन्येऽपि बहवः मोक्षोपायाः आयुर्वेदे उपदिश्यन्ते। प्रायेण सर्वेऽपि उपायाः चित्तशुद्धिद्वारा मोक्षहेतवः भवन्ति। ते च यथा - सतामुपासनम्, दुष्टानां परित्यागः, चन्द्रायणादिव्रताचरणं, आत्मशुद्धये उपवासः, धर्मशास्त्राणां पालनं, प्रमाणैरेव ज्ञानप्राप्तिः, एकान्तवासः, कामक्रोधादीनां परित्यागः, मोक्षसाधककर्मसु प्रवर्तनं, अतिशयेण मनोनियमनम्, कर्मस्वप्रवृत्तिः, कृतानां कर्मणाम् उपभोगेन क्षयः, संन्यासः, "अहं करोमि, ममेदम्" इत्याद्यहङ्काराहित्यम्, आत्मशरीरसंयोगे भयदर्शनम्, अन्तःकरणस्य समाधिः[299], वस्तूनां यथार्थ्यपरीक्षणसामर्थ्यं, तत्त्वस्मृतिश्च300 मोक्षोपायः आयुर्वेदे प्रतिपादितः। उक्तञ्च -

**"सतामुपासनं सम्यगसतां परवर्जनं।**

**व्रतचर्योपवासौ च नियमाश्च पृथग्विधाः॥**

---

293. परमाणुपरमहत्वान्तोऽस्य वशीकारः - यो.सू.1/40

294. यो.सू.1/20

295. व्यासभाष्यम् (यो.सू.) 1/20

296. यो.सू.1/21

297. चरक.शरीर.1/137

298. चरक.शरीर.1/138, 139

299. योगप्रतिपादितानां ध्यान-धारण-समधिनामभ्यासः।

300. सतां सेवादारभ्य: मनसः नियमपर्यन्तैः उपायैः सर्वेषां सांसारिकभावनां यथार्थ्यं तत्वं विज्ञायेत्। तेन च संसारोऽयं दुःखरूपमिति दोषदर्शनात्, तत्र विरति तत्त्वस्मृतिः उच्यते। उक्तं च - "स्मृतिः सत्सेवनाद्यैश्च धृत्यन्तैरुपजायते।
स्मृत्या स्वभावं भावानां स्मरन् दुःखात्प्रमुच्यते॥" इति
- चरक.शारीर.1/147

© 2018 IJSRSET | Volume 4, Issue 1, January-February-2018
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 1797-1827

**धारणं धर्मशास्त्राणां विज्ञानं विजने रतिः।**

**विषयेष्वरतिर्मोक्षे व्यवसायः परा धृतिः॥**

**कर्मणामनारम्भः कृतानां च परिक्षयः।**

**नैष्कर्म्यमनहङ्कारः संयोगे भयदर्शनम्॥**

**मनोबुद्धिसमाधानमर्थतत्त्वपरीक्षणम्।**

**तत्त्वस्मृतेरुपस्थानात्सर्वमेतत्प्रवर्तते॥**[301] इति।

अपि च[302] मुमुक्षुणा प्रथमम् आचार्याभिगमनम्, तदुपदेशानुष्ठानम् अवश्यं विधेयमुच्यते आयुर्वेदे। धर्मशास्त्राणामपि पालनं चित्तशुद्धिद्वारा मोक्षोपायः भवति। अपि मुमुक्षुणा संन्यासस्वीकारः, तद्धर्माणां च पालनमपि करणीयम्। शीतोष्णादिद्वन्द्वसहिष्णुता, योगाभ्यासः, नित्यानित्यवस्तुविवेकः च मोक्षसाधनमुच्यते आयुर्वेदविद्भिः। पुर्वोक्तैः उपायैः अन्तःकरणं सर्वप्रकारेण शुद्धं भवति। तदा अखण्डब्रह्माकारका सत्या बुद्धिः मात्रमुत्पद्यते। सा बुद्धिः समूलं संसारमहामोहं दहति। तदा नित्यमजरं शान्तम् अखण्डैकरसं ब्रह्म प्रकाशते, स एव मोक्षः उच्यते। उक्तञ्च –

**"एतैर्विमलं सत्त्वं शुद्ध्युपायैर्विशुद्ध्यति।**

**ज्वलत्यात्मनि संरुद्धं तत् सत्त्वं संवतायने।**

**शुद्धः स्थिरः प्रसन्नर्चिर्दीपो दीपशये यथा॥**

**शुद्धसत्त्वस्य या शुद्धा सत्या बुद्धिः प्रवर्तते।**

**यया भिनत्त्यतिबलं महामोहमयं तमः॥**

**याति ब्रह्म यया नित्यमजरं शान्तमव्ययम्।"**[303] इति।

**जीवन्मुक्तिः**– अखण्डब्रह्मकारज्ञानेन सकलकार्य–परिणाम्युपादनस्य अज्ञानस्य नाशेन स्वस्वरूपे सच्चिदानन्दब्रह्मणि अवस्थानं मोक्षः इति प्रतिपादितम्। एवम् आत्मज्ञानेन तद्विरोधि–अविद्याकार्यभूतानां सर्वेषां कर्मणाम् अनारब्धफलानां नाशः भवति। उक्तञ्च – "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"[304], "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन"[305] इत्यादिरूपेण। आत्मज्ञानेन अनारब्धफलाननां शुभानामशुभानां सर्वेषामपि कर्मणां नाशः। ब्रह्मज्ञानिदृष्ट्या अशुभानामिव शुभानामपि कर्मणां तुच्छत्वात्, सर्वम् आत्मज्ञानेन नश्यति। किन्तु आरब्धफलानां कर्मणां तु उपभोगेनैव क्षयः। उक्तञ्च –"तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये"[306], "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि"[307] इति च। आचार्याः अपि – "प्रवृत्तफलानाम् उपभोगेनैव क्षीयमणत्वात्" [308] इति ऊचुः। अतः मुक्तानामपि आरब्धफलानाम् उपभोगः अनिवार्यः। एवं ये मुक्ताः अखिलबन्धरहिताः अपि आरब्धफलानां भोगाय देहधारणं कुर्वन्ति ते जीवन्मुक्ताः इत्युच्यन्ते। उक्तञ्च –

**"यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः।**

**अथ मर्त्योऽमृतो भवत्येतावद्ध्यनुशासनम्॥"**[309],

**"स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः"**[310],

---

301. चरक.शारीर.1/143,144,145,146

302. चरक.शारीर.5/12

303. चरक.शारीर.5/13–19

304. मुं.उ.3/8

305. छां.उ.6/14/2

306. छां.उ.6/14/2

307. ब्रह्मवैवर्तपुराणम्?, परिभाषादिषु प्रकरणग्रन्थेषु भामत्यां भाष्यरत्नप्रभादिषु व्याख्यानेषु इदं स्मृतिवचनम् उद्धृतम्। तद्यथा भामत्यां (4/1/13) "अत एव स्मरन्ति नाभुक्तं क्षीयते कर्मेति" इति।

308. छां.उ.6/14/2

309. कठ.उ.6/15

310. छां.उ.7/26/2

**"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।**
**अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते।। "**[311] इति।

जीवन्मुक्तिः निर्विकल्पकसमाधिरित्यपि उच्यते। तल्लक्षणमुक्तं वेदान्तसारे– "ज्ञातृज्ञानादिविकल्पलयापेक्षया अद्वितीयवस्तुनि तदाकाराकारितायाः अतितराम् एकीभावेन अवस्थानम्"[312] इति। अपि च सम्प्रज्ञातसमाधौ चत्वारः विघ्नाः वेदान्तसारे प्रतिपादिताः। ते च लयः विक्षेपः कषायः रसास्वादश्च[313]। तत्र लयः अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेः निद्रा[314]। अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेः अन्यावलम्बनं विक्षेपः [315]। लय–विक्षेपयोः अभावे अपि चित्तवृत्तेः रागादिवासनया स्तब्धीभावात् अखण्डवस्तु–अनवलम्बनं कषायः [316]। चित्तवृत्तेः अखण्डवस्त्वनवलम्बनेन सविकल्पकसमाधौ एव आनन्दास्वादनं रसास्वादः[317], येन च निर्विकल्पकसमाधौ प्रयत्नः एव न स्यात्। अन्येऽपि विघ्नाः वेदान्तग्रन्थेषु प्रतिपादिताः। यथा –

**"समाधौ क्रियमाणे तु विघ्ना ह्यायान्ति वै बलात्।। "**

**"अनुसन्धानराहित्यमालस्यं भोगलालसम्।**
**भयं तमश्च विक्षेपस्तेजस्पन्दश्च शून्यता।। "**[318] इति।

एतेषां विघ्नानां परिहारपूर्वकं यदा चित्तम् अखण्डचैतन्यमात्रमवतिष्ठते स निर्विकल्पकसमाधिरुच्यते। उक्तञ्च –

**"लये सम्बोधयेत् चित्तं विक्षिप्तं शमयेत्पुनः।**
**सकषायं विजानीयात् शमप्राप्तं न चालयेत्।। "**
**"नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवत्।"**[319]

**"एवं यद्विघ्नबाहुल्यं त्याज्यं तद्ब्रह्मविज्जनैः।**
**विघ्नानेतान्परित्यज्य प्रमादरहितो वशी।**
**समाधिनिष्ठया ब्रह्म साक्षाद्भवितुमर्हसि।। "**[320] इति।

गीतायां च "यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता"[321] इति निर्वितर्कसमाधिः जीवन्मुक्तिः वर्णितः।

तस्य जीवन्मुक्तस्य निर्विकल्पकसमाधिमतः ज्ञानात् पूर्वं विद्यामानमेव आहारविहारादिकम् अनुवर्तते। किन्तु एषु व्यवहारेषु सः ब्रह्मदृष्टिः उदासीनः निर्लिप्तः तिष्ठति। उक्तञ्च – "न मातृवधेन न पितृवधेन"[322],

**"विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः।**
**निर्ममो निरहङ्कारः स शान्तिमधिगच्छति।। "**[323],

**"यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते।**

---

311. बृ.उ.4/4/7
312. वेदान्तसारः 197
313. वेदान्तसारः 209
314. वेदान्तसारः 210
315. वेदान्तसारः 211
316. वेदान्तसारः 212
317. वेदान्तसारः 213
318. सर्ववेदान्त.921,922
319. गौडपादकारिका 3/44,45
320. सर्ववेदान्त.923
321. भ.गी.6/19
322. कौ.उ.2/1
323. भ.गी.2/71

**हत्वापि स इमान् लोकान् न हन्ति न निबध्यते॥"**[324] इति।

यदि जीवन्मुक्तस्य कर्म न लिप्यते तर्हि सः यथेच्छं स्वच्छन्दं व्यवहरेत् इति न चिन्तनीयम्। ब्रह्मनिष्ठः शुद्धचित्तः शुभमेव कर्म अनुसरेत् नाशुभं किञ्चित्। अन्यथा जीवन्मुक्तस्य दुष्टस्य च को भेदः स्यात्। आत्मज्ञानेन धर्मस्यापि नाशे कथमधर्मोत्थितं स्वच्छन्दव्यवहारदिकं शक्यम्। उक्तञ्च –

**"अधर्माज्जायतेऽज्ञानं यथेष्टाचरण च ततः।**

**धर्मकार्यो कथं तत्स्यात् यत्र धर्मो विनश्यति॥"**[325],

**"बुद्धात्वैतसतत्त्वस्य यथेष्टाचरणं यदि।**

**शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे॥ "**[326] इति।

आचार्याः अपि "यथाकामित्वं तु दोषः अत्यन्तम् अप्राप्तम्, अत्यन्तमूढविषयत्वेन अवगमात्। तथा शास्त्रचोदितमपि कर्म आत्मविदः अप्राप्तं गुरुभारतया अवगम्यते। किमुत अत्यन्त–अविवेकनिमित्तं यथाकामित्वम्"[327] इति स्पष्टतया जीवन्मुक्तस्य यथाकामित्वासम्भवं प्रतिपादयन्ति। अतः शुभानामेव गुणानां व्यवहारे अनुवर्तनं भवति नाशुभानाम्।

अस्य जीवन्मुक्तस्य आत्मश्लाघनराहित्यम्, अदम्भित्वम्, अहिंसा, परस्य अपराधे अपि अप्रतीकारः, अवक्रत्वम्, गुरुशुश्रूषा, वाक्कायमनसां शुद्धिः, बाह्यवस्तुषु वैराग्यं, ममत्वाभावः, जन्ममृत्युजराव्याधिषु दोषानुदर्शनं, विषयेषु प्रीत्यभावः, पुत्रदारागृहादिषु सुखिते दुःखिते अपि अहमेव सुखी दुःखी इत्यादिभावनाराहित्यम्, समचित्तत्वम्, भगवतः अहम् अनन्यः इति भक्तिः, एकान्तवासे पवित्रस्थलवासे च रुचिः, दुर्जनसङ्गराहित्यम्, मोक्षालोचनम्, मोक्षसाधनानुष्ठानम्, अद्वेषः, मैत्रीभावः, करुणा, क्षमा, सन्तोषः, प्रयत्नशीलता, ईश्वरार्पणबुद्धिः, अनुद्वेगः, कर्मसंन्यासः,

सर्वेषु समभावः, स्थितप्रज्ञत्वम् इत्यादयः[328] श्रेष्ठाः गुणाः अप्रयत्नेन सहजरूपेण एव भवन्ति। उक्तञ्च–

**"उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः।**

**अयत्नतो भवन्त्यस्य न तु साधनरूपिणः॥ "**[329],

"तदानीम् अमानित्वादीनि ज्ञानसाधनानि अद्वेष्टृत्वादयः सद्गुणाश्च अलङ्कारवत् अनुवर्तन्ते"[330] इति। गीतायाः द्वितीये "स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव"[331] इति अर्जुनस्य प्रश्नं प्रति उत्तरं प्रयच्छन् भगवान् जीवमुक्तस्य लक्षणानि वर्णयति। आचार्याश्च "स्थिता अहमस्मि परं ब्रह्म इति प्रज्ञा यस्य सः स्थितप्रज्ञः"[332] इति जीवन्मुक्तमेव स्थितप्रज्ञं वदन्ति। तस्य लक्षणानि च प्रतिपादितं भगवता–

**"प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्।**

**आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते॥**

**दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।**

**वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥**

**यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम्।**

**नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता॥**

**यदा संहरते चाऽयं कूर्मोङ्गानीव सर्वशः।**

---

[324]. भ.गी.18/17

[325]. नैष्कर्म्यसिद्धिः 4/62

[326]. नैष्कर्म्यसिद्धिः 4/62,63

[327]. ऐ.भा.1/1

[328]. भ.गी.12/ 13–19, 13/7–11

[329]. नैष्कर्म्यसिद्धिः 4/69

[330]. वेदान्तसारः 224

[331]. भ.गी.2/54

[332]. गी.भा.2/54

© 2018 IJSRSET | Volume 4, Issue 1, January-February-2018
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 1797-1827

**इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता॥ "**[333] इति।

जीवन्मुक्तस्य कर्माणि कामैः तत्कारणैः सङ्कल्पैश्च वर्जितानि लोकसङ्ग्रहार्थं क्रियन्ते। उक्तञ्च –

**"यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः।**

**ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः॥ "**[334] इति।

एवं कर्मफलेभ्यः सङ्गरहितस्य जीवन्मुक्तस्य क्रियमाणमपि कर्म अकृतमेव भवति। स न केनापि कर्मणा सज्जते। उक्तञ्च – "कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः", "शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्", "कृत्वापि न निबध्यते", "आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय"[335] इत्यादिरूपेण।

योगशास्त्रविदः अपि वेदान्तिनः इव जीवन्मुक्तिं वर्णयन्ति। यमादीनाम् ईश्वरप्रणिधानादीनां च उपायानामभ्यासात् योगशास्त्रविदः सम्प्रज्ञात-समाधिसिद्धौ प्रकृतिपुरुषयोः विवेकज्ञानमुदेति। तस्य विवेकज्ञानात्मकस्य परवैराग्यस्य अभ्यासेन निरोधसंस्काराणाम् उत्पत्तौ व्युत्थानसंस्काराः दग्धबीजकल्पाः विनष्टाः भवन्ति, स निर्बीजसमाधिः धर्ममेघसमाधिः सिद्ध्यति। तदेव उक्तं – "विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः"[336], "सर्वनिरोधान्निर्बीजः समाधिः"[337], "प्रसङ्ख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः"[338] इत्यादिषु सूत्रेषु। तल्लाभे योगी जीवन्नेव मुक्तः भवति। तदुक्तं – "तस्मिन्निवृत्ते पुरुषः स्वरूपमात्रप्रतिष्ठोऽतः शुद्धः केवलः मुक्तः इत्युच्यते"[339], "जीवन्नेव विद्वान्मुक्तो भवति"[340] इत्यादिरूपेण। तस्य च जीवन्मुक्तस्य अविद्यादयः क्लेशाः समूलकाशं नष्टाः भवन्ति। तदुक्तं – "ततः क्लेशकर्मनिवृत्तिः"[341] इति। अत्र कर्मनिवृत्तिरिति सञ्चितानामागामिनां च कर्मणामेव नाशः वक्तव्यः। प्रारब्धानां तु उपभोगेन एव क्षयः इति योगिजनाः अपि वदन्ति। तदुक्तं – "ज्ञानसंस्कारास्तु चित्ताधिकारसमाप्तिपर्यन्तम् अनुशेरते"[342] इति। चित्ताधिकारः इति प्रारब्धकर्म एव उच्यते। अतः वेदान्तिन इव योगशास्त्रविदः अपि प्रारब्धकर्मपरिसपाप्तिपर्यन्तं जीवन्मुक्तस्य देहधारणमङ्गीकुर्वन्ति इति सिद्धम्।

आयुर्वेदिनः अपि जीवन्मुक्तः सर्वासु अवस्थासु सर्वं शुभाशुभं कर्म कुर्वन् अपि न तैः कर्मभिः लिप्यते इति प्रतिपादयन्ति। सः ब्रह्मभूतः सर्वं शुभाशुभमलिप्तः सन् केवलं पश्यति, न कदापि तेषु लिप्यते। उक्तञ्च –

**"पश्यतः सर्वभावान् हि सर्वावस्थासु सर्वदा।**

**ब्रह्मभूतस्य संयोगो न शुद्धस्योपपद्यते॥ "**[343] इति।

शुभाशुभमिति व्यपदेशे अपि निरस्तस्मस्तमलः शुभमेव कर्म करोति, नाशुभं कदाचिदपि इति अवगन्तव्यम्। किञ्च शुभमपि कर्म केवलं लोकसङ्ग्रहार्थमेव तेन क्रियते इत्यपि अत्र ज्ञातव्यम्। इत्थं वेदान्त-योग-आयुर्वेदशास्त्रेषु ऐकमत्येन जीवन्मुक्तः वर्णितः।

**विदेहमुक्तिः-** जीवन्मुक्तः प्रारब्धकर्मनिमित्तदेहधारणमात्रं कुर्वन् इष्टानिष्टं सर्वं ममत्ववर्जितः भुञ्जानः भवति इति प्रतिपादितम्। एवं प्रारब्धकर्मणां शरीरधारणेन भोगे सति, तत्फलसमाप्तौ देहपरित्यागेन तस्य प्राणः अद्वितीये परब्रह्मणि लीनः भवति। तदा सकल-अज्ञान-तत्कार्य-संस्काराणां च नाशेन अखण्डैकरसं ब्रह्म केवलम् अवतिष्ठते। इदं परमकैवल्यं विदेहमुक्तिः इत्युच्यते। उक्तञ्च – "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये"[344], "न तस्य प्राणाः उत्क्रामन्ति"[345], "अत्रैव समवनीयन्ते"[346], "विमुक्तश्च विमुच्यते"[347] इति।

---

333. भ.गी.2/ 55- 58
334. भ.गी.4/19,
335. भ.गी.4/20.21.22.41
336. यो.सू.1/18
337. यो.सू.1/51
338. यो.सू.4/29
339. व्यासभाष्यम् (यो.सू.) 1/51
340. व्यासभाष्यम् (यो.सू.) 4/30
341. यो.सू.4/30
342. यो.सू.4/28
343. चरक.शारीर.6/22
344. छां.उ.6/14/2
345. बृ.उ.4/4/6

© 2018 IJSRSET | Volume 4, Issue 1, January-February-2018
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 1797-1827

योगशास्त्रविदः विदेहमुक्तिं कैवल्यमिति वदन्ति। योगशास्त्रविदः धर्ममेघसमाधिसिद्धौ अविद्यानिमित्त-सर्वक्लेशकर्मनिवृत्तौ पुरुषस्य भोगापवर्गसाधनेन कृतार्थानां सत्त्वादिगुणानां परिणामक्रम-निवृत्तिर्भवति। तदुक्तं – "ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम्"[348] इति। अत्र गुणानां क्रमो नाम चित्तरूपेण[349] इन्द्रियरूपेण भूतरूपेण वा अवस्थाविशेषाः। अतः गुणानां क्रमनिवृत्तिरित्यनेन शरीरपातः एव अभिप्रेयते इति अवगन्तव्यम्। एवं गुणानां कृतार्थतया शरीरपाते सति योगी स्वरूपप्रतिष्ठः भवति, तत्कैवल्यं विदेहमुक्तिः उच्यते योगिजनैः। तदुक्तं – "पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति"[350] इति। इत्थं वेदान्त-योगशास्त्रयोः जीवस्य परब्रह्मणि आत्यन्तिकमेकत्वं विदेहमुक्तिरिति ऐकमत्येन प्रतिपाद्यते।

इत्थं मोक्षस्वरूपे तदुपायेषु वेदान्त-योग-आयुर्वेदशास्त्राणाम् अविरोधः लक्ष्यते इति स्थितम्।

**सङ्केताक्षरसूची –**

| | |
|---|---|
| ईश.उ. | ईशावास्योपनिषत् |
| केन.उ. | केनोपनिषत् |
| कठ.उ. | कठोपनिषत् |
| मुं.उ. | मुण्डकोपनिषत् |
| मां.उ. | माण्डुक्योपनिषत् |
| प्र.उ. | प्रश्नोपनिषत् |
| तै.उ.शिक्षा. | तैत्तिरियोपनिषत् शिक्षावल्ली |
| तै.उ.ब्रह्म. | तैत्तिरियोपनिषत् ब्रह्मवल्ली |
| तै.उ.भृगु. | तैत्तिरियोपनिषत् भृगुवल्ली |
| ऐ.उ. | ऐतरेयोपनिषत् |
| बृ.उ. | बृहदारण्यकोपनिषत् |
| छां.उ. | छान्दोग्योपनिषत् |
| कौ.उ. | कौषीतकी उपनिषत् |
| श्वेत.उ. | श्वेताश्वतरोपनिषत् |
| भा. | शाङ्करभाष्यम् |
| ब्र.सू. | ब्रह्मसूत्रम् |
| सू.भा. | ब्रह्मसूत्र-शाङ्करभाष्यम् |
| भ.गी. | भगवद्गीता |
| गी.भा. | भगवद्गीता शाङ्करभाष्यम् |
| वे.परि. | वेदान्तपरिभाषा |
| सर्ववेदान्त. | सर्ववेदान्तसिद्धान्तसारसङ्ग्रहः |
| पं.दशी. | पञ्चदशी |
| शास्त्रसिद्धान्त. | शास्त्रसिद्धान्तलेशसङ्ग्रहः |
| विवेक.चू. | विवेकचूडामणिः |
| अ.सिद्धि. | अद्वैतसिद्धिः |

346. बृ.उ.3/2/11
347. कठ.उ.5/1
348. यो.सू.1/32
349. बुद्धि-अहङ्कार-मनोरूपेण
350. यो.सू.4/34

| | |
|---|---|
| यो.सू. | योगसूत्रम् |
| चरक. | चरकसंहिता |
| सुश्रुत. | सुश्रुतसंहिता |
| माधव. | माधवनिदानम् |
| तै.सं. | तैत्तिरियसंहिता |
| अथर्व.सं. | अथर्वसंहिता |
| शारीर. | शारीरस्थानम् |
| चिकित्सा. | चिकित्सास्थानम् |
| पृ. | पृष्ठसङ्ख्या |

**अनुशीलितग्रन्थसूची -**


1. श्रीशङ्करभगवत्पादाः (सं - एस्.सुब्रह्मण्यशास्त्री, मणिद्रविडः): उपनिषद्भ्याष्यम्/ दक्षिणामूर्ति मठ प्रकाशन, वाराणसी / 2004.
2. श्रीशङ्करभगवत्पादाः (सं - आचार्य जगदीशशास्त्री) : ब्रह्मसूत्र-शाङ्करभाष्यम् (भाष्यरत्नप्रभया भामत्या न्यायनिर्णयेन च समुपेतम्)/ मोतिलाल बनारसीदास,वाराणासी/ 2005
3. श्रीशङ्करभगवत्पादाः (सं - वासुदेवशर्मा) : श्रीमद्भगवद्गीताभाष्यम् (अष्टटीकोपेतम्)/ चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी/ 2016
4. विद्यारण्यः - सं)वासुदेवशर्मा) : पञ्चदशी/ चौखम्बा संस्कृत सीरीज आफिस, वाराणसी/ 2009
5. अप्पयदीक्षतः (सं - एस्.आर्.कृष्णमूर्तिशास्त्री, डा.एन्.वीळीनाथन्) : शास्त्र-सिद्धान्त-लेश-सङ्ग्रहः (कृष्णालङ्कारव्याख्यया सहितः)/ श्रीमत्-अप्पय्यदीक्षितेन्द्र-ग्रन्थावलि-प्रकाशन-समितिः, वाराणसी/ 2008.
6. धर्मराजाध्वरीन्द्रः (सं - प्रो.पारसनाथ द्विवेदी) : वेदान्तपरिभाषा/ सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी/ 2000.
7. मधुसूदनसरस्वती (सं - श्री-शीतांशुशेखर-देवशर्मा) : अद्वैत-सिद्धिः (बालबोधिनी-व्याख्या-समेतम्/ रत्ना पब्लिकेशन्स्, वाराणसी/ 2007.
8. सदानन्दयतिः (सं - ಸ್ವಾಮೀ ಹರ್ಷಾನಂದ) : ವೇದಾಂತಸಾರ (ಮೂಲ ಅನುವಾದ ಟಿಪ್ಪಣಿ ಸಹಿತ)/ ಶ್ರೀ ರಾಮಕೃಷ್ಣಾಶ್ರಮ, ಬೆಂಗಳೂರು/ ೨೦೦೭.
9. श्रीशङ्करभगवत्पादः : विवेकचूडामणिः/ अभिनव विद्यातीर्थ एजुकेशनम् ट्रस्ट्, बेङ्गलूरु/ 1904.
10. तिलक मोहन् राव् : कारिकाकरः/ वेदविज्ञानगुरुकुलम्, बेङ्गलूरु/ 2010
11. सायणमाधवाचार्यः (सं - त्र्यम्बकः) : सर्वदर्शनसङ्ग्रहः.(दर्शनाङ्कुरव्याख्यासमेतः)/ भाण्डार्कर् प्राच्यविद्या-संशोधनमन्दिरम्, पुणे/ 1978.
12. श्रीशङ्करभगवत्पाः (सं - पण्डित रामस्वरूपशर्मा) : सर्ववेदान्त-सिद्धान्त-सार-सङ्ग्रहः/ सनातनधर्म यन्त्रालय, पुणे/ 1979
13. प्रकाशात्मयतिः : पञ्चपादिकाविवरणम्/ राष्ट्रिय-संस्कृत-विद्यापीठम्, तिरुपतिः/ 2002.
14. सं- गङ्गाधरबापूराव् काले : श्वेताश्वतरोपनिषत्/ आनन्दाश्रमसंस्कृत-ग्रन्थवली, पुणे/ 1966.
15. सुरेश्वराचार्याः : बृहदाराण्यकोपनिषद्भाष्य-वार्तिकम्/ महेश रिसर्च इन्स्टिट्यूट्/1980.
16. विद्यारण्यमुनिः : विवरणप्रमेय सङ्ग्रहः/ अमर पब्लिकेशन्स्, वाराणसी/ 1999
17. सर्वज्ञात्ममुनिः : संक्षेपशारीरकम्/ चौखम्बा संस्कृतसंस्थान, वाराणसी/ 1992.
18. मधुसूदनसरस्वती : सिद्धान्तबिन्दुः/ भण्डार्कर् ओरियण्टल् इन्स्टिट्यूट्, पुणे/1986.
19. विद्यारण्यमुनिः : जीवन्मुक्तिविवेकः/ रामकृष्णाश्रम, बेङ्गलूरु/ 2990.
20. सं - टि एन् धर्माधिकारी : तैत्तिरीयसंहिता/ वैदिक संशोधन मण्डल, वाराणसी/1999
21. मनुमहर्षिः : मनुस्मृतिः/ समाज पुस्तकालय, धारवाड/ 1994.
22. स्मृतिकाराः : स्मृतिसन्दर्भः/ नाग् पब्लिकेशन्स्, दिल्ली/ 1998.
23. भगवान् व्यासः : महाभारतम्/ गीताप्रेस्, गोरखपुर/ 1998.

24. सं – प्रभातशास्त्री : वायुपुराणम्/ हिन्दी साहित्य सम्मेलन, प्रयाग/ 1987.
25. भगवान् व्यासः : भागवतपुराणम्/ गीताप्रेस्, गोरखपुर/ 1997.
26. सं – गणेश विनायक आप्टे : उपनिषदां समुच्चयः/ आनन्दाश्रमसंस्कृतग्रन्थावली, पुणे/1925
27. गणेश शास्त्रि गोखलेः वेदान्तसूत्रमुक्तावलिः/ आनन्दाश्रमसंस्कृतग्रन्थावली, पुणे/ 1915
28. मधुसूदनसरस्वती : वेदान्तकल्पलतिका/ भण्डार्कर् ओरियेण्टल् इन्स्टिट्यूट्/ 1962.
29. श्रीकृष्णयज्वा : मीमांसापरिभाषा/ कृष्णदास अकाडेमी, वाराणसी/ 1994.
30. रामानन्दसरस्वती : विवरणोपन्यासः/ व्रजदास एण्ड कम्पेनी/ 1900.
31. भारतीतीर्थमुनिः : वैयासिकन्यायमाला/ आनन्दाश्रमसंस्कृतग्रन्थावली, पुणे/ 1891.
32. टि.आर्. चिन्तामणिः : प्रकटार्थविवरणम्/ मद्रास् विश्वविद्यालयः/191.
33. पतञ्जलिः (सं – स्वामी श्रीब्रह्मलीनमुनिः) : पातञ्जलयोगदर्शनम् (योगभाष्य–विवृत्तिव्याख्योपेतम्)/ चौखम्बा प्रकाशन, वाराणसी/ 2017.
34. पतञ्जलिः (सं – श्रीरामशङ्करभट्टाचार्यः) : पातञ्जलयोगदर्शनम् (तत्त्ववैशारदी–व्यासभाष्यसमेतम्)/ भारतीय विद्या प्रकाशन, वाराणसी/ 196.
35. सुश्रुतः (सं – डा. अम्बिकादत्त शास्त्री) : सुश्रुतसंहिता (आयुर्वेदतत्त्वसन्दीपिका–सहिता)/ चौखम्भा संस्कृत संस्थान, वाराणसी/ 2018.
36. शाङ्र्गधरः (सं – विद्यासागर पण्डित परशुराम शास्त्री) : शाङ्र्गधरसंहिता (दीपिका–गूढार्थदीपिकया संवलिता)/ चौखम्भा सुरभारती प्रकाशन, वाराणसी/ 2018.
37. स्वात्मारामयोगीन्द्रः : हठयोगप्रदीपिका (ज्योत्स्ना–भाषाटीकोपेता)/ क्षेमराज–श्रीकृष्णदासश्रेष्ठी/ 2009
38. अचार्यः दत्तात्रेयः : दत्तात्रेय–योगशास्त्रम्/ archive.org.